पूर्णपात्रम्

प्रणेता

शिरोमणिः सन्निधानम् सूर्यनारायण शास्त्री,
पी. ओ. एल्.

संस्कृताचार्यः, राजा बहादुर वेंकट्रामारेड्डी महिलाकलाशाला, हैदराबाद्

विलम्बी माघमासः

प्रथमावृत्तिः

मूल्यम् रु. १

अजन्ता प्रिण्टर्स्
सिकन्दराबाद

विद्वद्भिर्ह्रियतां मित्रै। रद्य 'षष्टिमहोत्सवे'।
हृद्यकाव्यानर्घवस्तु। पूर्णपात्र मिदं मम॥

श्रीः

कृतिपतिप्रशस्तिः

श्री माडपाट्यन्वयवार्धिचन्द्र । श्चकास्ति डाक्टर् हनुमन्तरायः ।
यः प्रापवा 'नान्ध्रपितामहे' त्यु । पाधिं त्यलङ्गाणजनै र्युवैव ॥ 1

यस्याभिधेयं त्यलगाणराष्ट्र । आस्ते जनानां रसनासु नृत्यत् ।
चित्राणि यस्य प्रतिगेहमर्चां । गृह्णन्ति देवप्रतिमासमानि ॥ 2

यः 'पद्मभूषणो' पाध्या । भ्यर्हितः परिपालकैः ।
हनुमानिव चावर्थ । नामा सेवापरायणः ॥ 3

तेलङ्गाणजनान् गाढं । निद्राणानुदितेऽपि यः ।
रवौ जागरयामास । गायन् प्राभातगीतिकाः ॥ 4

उत्तानहृदयः शान्तो । देशभाषाभिमानवान् ।
अजातशत्रु र्यो भाति । आन्ध्रदेशनभोमणिः ॥ 5

वृद्धोऽपिच युवेवाद्य । कार्यभारान् सुदुर्वहान् ।
वहत्येव; महासारः । प्रोच्यते हि जरत्तरुः ॥ 6

बालिकानां पाठशाला । कलाशाला च योषिताम् ।
संस्थे द्वे विदुषो यस्य । अभूतां प्रियपुत्रिके ॥ 7

बीजमुप्तं पुरा येन । देशभाषाभिमानिना ।
आन्ध्रप्रदेशावतार । स्याद्य प्रासूत तत्फलम् ॥ 8

माणिक्यांबा यस्य साध्वी । रवे श्छायेव राजते ।
महिलामण्डलस्यैषा । माणिक्यमिति शस्यते ॥ 9

"मम बन्धु र्ममाप्तोऽयं । मम मित्रं हितो मम ।"
इयाख्यान्ति हनूमन्त । रायं स्वीयतया जनाः ॥ 10

स्पृहयन्ती काव्यकन्या । ममैषा गुणसंपदे ।
चतुःसप्ततिवर्षीय । मप्येनं वृणुते पतिम् ॥ 11

सुरभाषासुधामूर्ति । कृतिकन्यात्मनः पतिम् ।
कर्तुमीष्टेऽमरं; तेन । नितान्तं भद्रमश्नुते ॥ 12

हनुमन्तराय ! जीवे । र्हनुमानिव भो ! श्चिरंजीवी ।
आरोग्यभाग्यमाप्नुहि । विजयन्ता मुद्यमा स्त्वयारब्धाः ! 13

FOREWORD

I have great pleasure in writing this foreword to the present work entitled PŪRNAPĀTHRAM written by Siromani Shri Sannidhanam Suryanarayana Sastri of Secunderabad. I have known him for a number of years and have great regard and admiration for his scholarship in Alankara and Vyakarana Sastras. He is the author of a number of Telugu books which are considered as very useful to students of Telugu literature. His favourite subject is the exposition of various theories of literary criticism according to Sanskrit tradition.

2. This small work is a collection of Sanskrit translations made by the author from Telugu. The title of the book means a "vessel filled with precious things." It is indeed so when we look into the various subjects with which this book deals. The titles of the subjects indicate that the author has collected in this "precious vessel" valuable ideas on ethical principles well-known to every reader of Sanskrit books. The language and style of the author are very simple, and yet fluent and racy. The parables of Sri Ramakrishna Paramahamsa have been narrated in an attractive manner. The author has avoided too many and unnecessary Shabda

Alankaras and has followed the suggestive method of Dhvani as propounded by Anandavardhana. Some poems deal with natural phenomena which are very common to English literature, and which also indicate the author's own tendency towards nature. The book contains three parts - the first dealing with religious and philosophical truths, and the second dealing with natural phenomena, and the third contains mystic poems. Thus this small book is enough to give a synthetic view of Indian cultural values.

3. My happiness in writing this foreword is further enhanced by the fact that the author has dedicated this valuable book to Andhra Pithamaha Madapati Hanumantha Rao Garu (Padma Bhushan), Chairman of the Andra Pradesh Legislative Council. The regard and esteem which is associated with this great leader of old Hyderabad State is something which can only be appreciated by those who have had the privilege of working with him as his followers and juniors in social and political life. I happen to be one of those lucky persons, and therefore I have no hesitation in saying that the author has expressed the genuine admiration of the people of Hyderabad for Andhra Pithamaha by dedicating his book to him. I pray that the author may be enabled by the Almighty to add more laurels to his literary achievements and serve Sanskrit and Telugu literature, as he has been doing throughout his life.

B. Ramakrishna Rao

Governor of Kerala

INTRODUCTION

अपूर्वं यद्वस्तु प्रथयति विना कारणकलां
जगद्ग्रावप्रख्यं निजरसभरात् सारयति च।
क्रमात् प्रख्योपाख्यप्रसरसुभगं भासयति तत्
सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयते ॥ —अभिनवगुप्तः

It is my privilege to introduce to the world of Sanskrit scholars the present work entitled PŪRNAPĀTRAM written by Vidyaratna, Siromani Sri Sannidhanam Suryanarayana Sastry. Sri Sastry garu is one of the great scholars of the Andhra Desa, his special subjects being Alankara Sastra and Vyakarana Sastra. He has written a number of works in Telugu which are highly useful to the teachers and students of the Telugu Literature. His KĀVYALANKĀRASANGRAHAVIVARANAM is a lucid and scholarly exposition of the various theories of the Sanskrit Literary Criticism. TATSAMA-CHANDRIKA is an elaborate and a unique work which deals with the Sanskrit grammar as applied to the Telugu Language. He is also the author of a good number of Khandakavyas, Sandesakavyas, Lyrics, Stories, Long Poems etc., both in prose and verse.

PŪRNAPĀTRAM is a collection of the Sanskrit translations made by the author from the original Telugu. PŪRNAPĀTRAM means a vessel filled with precious things presented to friends, relatives or servants on festive occasions.

"हर्षादुत्सवकाले यदलंकारांशुकादिकम् ।
आकृष्य गृह्यते **पूर्णपात्रं** पूर्णानकं च तत् ॥"

—Hāravali

"कदा नु मे तनयजन्ममहोत्सवानंदनिर्भरो हरिष्यति **पूर्णपात्रं** परिजनः"

—Kādambarī

"तत्कामं प्रभवति **पूर्णपात्रवृत्त्या** स्वीकर्तुं मम हृदयं च जीवितं च।"

—Mālatīmādhava 4–1

"शांभवं चाप मारोप्य योऽस्मा नानंदयिष्यति।
पूर्णपात्रमियं तस्मै जानकी कल्पयिष्यते॥"

—Anargha Rāghava 3-45

It may also mean that each poem in this work is a PĀTRA filled with the KĀVYA RASA to be relished and enjoyed by the SAHṚDAYA. वाक्यं रसात्मकं काव्यं।

The author's style is simple, plain and forceful. It is characterised by grammatical purity, clarity of thought, richness of ideas, precision and brevity combined with ease. In short, it is marked by PRASĀDA GUNA which Vamana defines as :

अर्थवैमल्यं प्रसादः। अर्थवैमल्यं प्रयोजकमात्रपदपरिग्रहे प्रसादः।

(Kāvyālankāra–sūtravṛtti 3–2–3)

The parable of the PREKSHAKA (page 2) is graphically narrated in three Āryās, in about forty words. The critical reader notices in these poems the free flow of spontaneous feelings clothed in appropriate language.

Poetic feelings are expressed in two ways, viz., SVABHĀVŌKTI and VAKRŌKTI. The former is the description of life as it is, and the latter the description of life as the poet understands and interprets it with his penetrative and emotional approach. This VAKRŌKTI is to be identified with the ALANKĀRA in general. Each one has

its own charm and appeal in Literature, both leading to the realisation of RASA. The following SAHŌKTI is quite charming:

निशाता एकलव्यस्य बाणा लक्ष्यं न केवलम् ।
किंत्वलक्ष्यं फल्गुनस्याप्यच्छिन्दन् हृदयं बत ॥

(Ekalavyam)

The following simile is highly suggestive:

प्राप्तमृत्यु र्लब्धजीवा बभासे सा रुरोर्दृशोः ।
प्रतप्तस्वर्णवल्लीव पूर्वतोऽपि समुज्ज्वला ॥

(Rurupramadvaram)

It is fortunate that the present author has not shown any tendency to make abuse of the Sabdālankāras and Arthālankāras like YAMAKA, ANUPRĀSA, SLESHA etc., which found great favour with many of the latter-day Sanskrit poets. दोषाभावोपि गुण एव ।

In the first part of this work twenty parables of Sri Ramakrishna Paramahansa are narrated in flowing and racy Sanskrit. The function of poetry is explained by Rudrata as:

ननु काव्येन क्रियते सरसानामवगम श्चतुर्वर्गे ।
लघु मृदु च नीरसेभ्य स्ते हि त्रस्यंति शास्त्रेभ्यः ॥

(Kāvyālankāra 10–1)

These parables are intended to teach profound truths of religion and philosophy. They are predominated by the sentiment of Humour. The conclusion of the Manivikraya is very appropriate:

स्वशेमुषीविशेषेण विजानाति महात्मनः ।
वैदुष्यं विदुषो मूल्यं रत्नस्येव जनो भुवि ॥

The EKALAVYA of the second part is of particular interest. In the original story as narrated in the Mahabharata, Drona cruelly demanded Gurudakshina from Ekalavya of whom he was not a practical Guru, which is in the form of the latter's right thumb to be cut off and presented to the former. The author made the character of Drona blemishless by making Arjuna demand such Gurudaksihna. This happy remodelling of the original story is justifiable by taking into account the maxim laid down by Anandavardhana in his Dhvanyaloka :

इतिवृत्तवशायातां त्यक्त्वाननुगुणां स्थितिम् ।
उत्प्रेक्ष्योप्यंतराभीष्टरसोचितकथोन्नय: ॥

The story of Squirrel contributing its humble service to Rama's cause is a very familiar one in the Andhra Desa. This story, Rurupramadvaram and Gānaparikshā are quite interesting.

The remaining poems deal with the phenomena of nature. Lyric poetry is subjective in nature and is the expression of the personality of the poet. They are a common feature in English Literature, the contributors to this branch being Wordsworth, Shelly, Keats and a host of other poets. These lyrics are characterised by the author's deep sympathy for nature. Our author's sympathy for the creeper is beautifully expressed :

पश्यतो मम नेत्राभ्यां प्रस्रुता बाष्पवाहिनी ।
अयत्नमवदं जाल्म किं कौंठे ते करौ न किम् ?
अनपचितकुसुमभारा नेत्रानंदिन्युदीक्षमाणानाम् ।
सुभगा सुवासिनीव वल्ली ते दृष्टि मपहंति ?

(Pushpāpachaya)

Wordsworth's lines are very well known.

Thanks to the human heart by which we live,
Thanks to its tenderness, its joys and fears,
To me the meanest flower that blows can give
Thoughts that do often lie too deep for fears.

The third part contains mystic poems. The author is inspired by the Gitanjali of Rabindranath Tagore in writing these poems. Though Sanskrit literature abounds with religious lyrics and ANYAPADESA-KAVYAS, this type of mystic poetry is not developed into an independent branch. Indian life stands for the harmonious synthesis of the four human values, DHARMA, ARTHA, KĀMA and MŌKSHA. Poetry emanates from the innermost depths of the national life. Moksha is also considered as one of the aims of Sanskrit poetry.

These mystic poems are characterised by depth of devotion, keen introspection, sincerity of feeling and impatient yearning for the Reality. Sometimes the poet catches a glimpse of the Eternal from beyond the surface of the Existence.

उपविशता सिकतासु मया नदीशीतलोर्मिकारूपान् ।
स्वकटाक्षान् करुणार्द्रान् प्रसारयन् वीक्षितो देवः ॥

The author deserves to be congratulated on his effort in bringing out the PŪRNAPĀTRAM which in these days of renaissance in Sanskrit is highly welcome. Andhrapitamaha, Padmabhushana Dr. Madapati Hanumantha Rao Pantulu Garu has laid the author and the lovers of Sanskrit under deep obligation by accepting to be the KṚTIPATI of this work.

Department of Sanskrit
Osmania University
Hyderabad, January 26, 1959.

B. R. Sastry

पूर्णपात्रम्

प्रथमो भागः

परमहंसकथाः

1. साक्षात्कारः

"भगवत्साक्षात्कारः । कथं भवे ? त्कथ्यतां कृपया ।
भगव !" न्नित्याचार्यम् । प्रवचनकालेऽब्रवी च्छिष्यः ॥ 1

"अनुसर ! मा" मित्युक्त्वा । गुरु स्सशिष्यो गतस्तदा दूरम् ।
किंचि त्प्रविश्य सरसीं । तमादिदेशात्र मज्जेति ॥ 2

आत्माज्ञया निमग्नस्य । मूर्ध्न्यधाय गुरुः करम् ।
यथा नोद्गच्छति जला । त्तथा बाढं न्यपीपिडत् ॥ 3

गुरुणा मुक्तः शिष्यः । शिर उन्नम्योद्गतः सरःसलिलात्
पृष्टो निर्भग्नस्य । स्वस्यावस्थां न्यवेदय त्तस्मै ॥ 4

"प्रतिरुद्धश्वासेन । हा ! धिक् कालासहेन निर्गंतुम् ।
क्षुभ्यच्चित्तेन मया । क्षपितं युगवत् क्षणं सलिले" ॥ 5

आकर्ण्य गुरुरवोचत् । "भगवान् साक्षाद्भवे दित्थम् ।
संक्षुब्धमानसाना । मनुक्षणं दर्शनाय निष्टपताम्" ॥ 6

2. वनपालिका - धीवरी च

उद्यान पालिकाया। स्सख्या: स्वस्या गृहं गता काचित् ।
मत्स्याजीवा रात्रौ । कृतातिथेया तयाऽवस त्तत्र ॥ 1

कृतभोजने उभे ते । कान्ते सल्लापगोष्ठिनिर्विष्टे ।
अविदितयामेऽर्धनिशि। सुषुप्सयास्तरणयो रशयिषाताम् ॥ 2

पार्श्वस्थपुष्पपुटिका । सुरभिलगन्धोंऽतरे कुटीरस्य ।
विसर; त्यलब्धनिद्रा। जाग्रत्येवास्ति दाशवधू: ॥ 3

शयनीयोभय तटयो। विलुठति; बहुश: समुपविशति ।
खिन्ते; पुनरपि शेते । सा किंकर्तव्यतामूढा ॥ 4

"विलुठस्यसुप्तभावा। शय्यायां क्लिश्यसेऽत्र को हेतु:?"
इति पृष्टा सख्या सा । "हुं हुं" कुर्वत्युवाच भुग्नमुखी ॥ 5

"मह्यं न रोचतेऽयम्। सुमगन्ध: सखि ! स एव निद्रां मे ।
दूरयति; कुवेणीं में । यच्छाजिघ्रामि किंचि" दिति ॥ 6

मत्स्याधानीं दत्ताम् । गृह्ण त्याघ्राय तद्गन्धम् ।
प्राप त्सा सुखनिद्राम् । याव दुषां न प्रबुद्धैव ॥ 7

कुत्सय न्नीश्वरस्यांघ्रि । पद्मगन्धं जडो बत ।
संसारस्यास्य दुर्गन्ध । माघ्रातुं धिगपेक्षते ॥ 8

3. प्रेक्षक:

कक्षाकटो जगाम। संद्रष्टुं वीथिनाटकं किमपि ।
प्रारप्स्यते विलंबे । नेत्यज्ञासी ज्जनैः स तत्रत्यैः ॥ 1

"नाट्यारंभं यावत् । स्वप्स्याम्यत्रे" ति चिन्तयित्वाऽयम् ।
सुप्तश्च प्रतिबुद्धः । श्रुतवां स्तन्नाटकं समाप्त मिति ॥ 2

विवृतकटं संवृत्य । कक्षे धृत्वा पुनर्गृहं यातः ।
एवं यातायातैः । श्राम्यति जन्तुरिह वेद्य मविदित्वा ॥ 3

4. धनमदः

मन्दभाग्येन केनापि । हारितं रूप्यकं क्वचित् ।
लब्ध्वा कश्चन मंडूको । जुगोपात्मबिलान्तरे ॥ 1

योऽपक्रान्तो भयभ्रान्तः । पुरा दृष्ट्वा गतागतान् ।
अधुना स मदोन्मत्त । स्तान् रट न्नभिधावति ॥ 2

उपगच्छन्तं वीक्ष्य । निकषात्मबिलं प्रमत्तगज, मस्थात् ।
उद्धृतचरणः सज्ज । स्तं निर्हन्तुं कृतभ्रुकुटिः ॥ 3

5. द्विर्हसतीश्वरः

"माभैषी र्भो अंब ! पुत्र महं जीवयामि ते रुग्णम्" ।
वैद्यं वदन्त मित्थम् । विलोकय न्नीश्वरो हसति ॥ 1

विभज्य भ्रातरौ तुल्यम् । पित्र्यं क्षेत्रं "ममास्त्विदम् ।
तत्तवास्त्वि" ति चान्योऽन्यम् । विगृह्णन्तौ हसत्यसौ ॥ 2

न जानीतेऽगदंकार । ईशः प्राणान् हरेदिति ।
भ्रातरौ च न जानाते । सव क्षेत्रं विभोरिति ॥ 3

6. शंभुर्वा ब्रह्मावा

कतरोऽभ्यधिकः शंभु। र्ब्रह्मा वेत्येकदा विनिर्णेतुम्।
*गालोडिते प्रवृत्ता। महामहापंडिताः सदसि॥ 1

तर्कप्रतितर्कशतै। र्मीमांसित्वापि बहुदिवसान्।
अन्यतर निर्णये ते। नासन् प्रभवः प्रतीपसिद्धांताः॥ 2

उपगम्य "पद्मलोचन"। मपाक्षिकं पंडितं प्रष्टुम्।
स्वीयं विवादवस्तु। प्रास्ताविष्टा मुभौ पक्षौ॥ 3

श्रुत्वा विवेकी सोऽब्रूत। "दृष्टपूर्वो मयापि वा
मत्पूर्वै र्वा नवा शंभु। र्न ब्रह्मावेति सस्मितम्॥ 4

7. श्रद्धा

कश्चिद्विप्रोऽनुदिनम्। सहस्रनामार्चनं कृत्वा।
नीराजनं समर्प्य च। निवेदयति देवमूर्तये भोज्यम्॥ 1

ग्रामान्तरं गमिष्यन्। कार्यवशा दाह पुत्रकं जनकः।
"गृहदेवता महरह। स्समर्च्य नैवेद्यमर्पय त्व" मिति॥ 2

वचनं पितुराहत्य। श्रुतेरिव श्रद्धया पुत्रः।
विरचय्य देवपूजां। समार्पिप द्भोज्यनैवेद्यम्॥ 3

---

* गालोडितम् = वाचां विमर्शः; —"सिद्धान्त कौमुदी"

साक्षात् तत्पात्रान्नम् । मूर्ति र्भुंक्त इति कृतश्रद्धः ।
पश्यन् स मुग्धबालः । सुचिरं तस्थौ; परन्तु नाभुंक्त ॥ 4

"किं भो मयापराद्धम्?। भगवा न्नाश्नाति भोज्यमिदम्"।
इति तेन विषण्णेन। पूजाः स्तुतयश्च विरचिताः शतशः॥ 5

पूजा भस्माहुतयः । स्तोत्राणि च बधिरगीतानि ।
भूतानीति विषण्ण । उच्चै र्बाष्पायमाणद्द गरोदीत् ॥ 6

साक्षात्कृत्य स देवः । पुरोऽन्नपात्रस्य समुपविश्य तदा ।
आश किल कणेहत्य। श्रद्धालो रीश्वरो भवेत्साक्षात्॥ 7

शून्यान्नपात्रहस्तं तम् । वीक्ष्यात्मीया स्समागतम् ।
तस्यान्नस्य कथांपृष्ट्वा । श्रुत्वा विस्मितचेतसः ॥ 8

"नास्माभि र्दृष्टचरम्। नापि श्रुतचर मये ! भगवान्।
यत्साक्षाद्भुंक्ते ऽन्नम्। पुण्योऽसी"त्यस्तुवन् बालम् ॥ 9

8. कूपमण्डूकः

निवस न्नास्ते कश्चन। कूपे मण्डूक एकाकी ।
जातोऽय मत्र वाप्याम् । वृद्ध श्चात्रैव कालेन ॥ 1

बाह्यं लोकं कूपा । न्नायं जानाति; धिक्! धिक्! तम्।
आयात एकदान्य । स्तं कूपं दर्दुरः कश्चित् ॥ 2

प्रथमो ऽप्राक्षी द्भेको । "भद्र ! कुतस्त्वं समायातः ?"
आगन्तुको ऽवद"द्भो। आयातोऽहं महोदधे र्दूरात्"॥ 3

"किं किं त्वमुदधिवासी ? अतिथिरसि स्वागतं भवते ।
स कियानुदधि र्ब्रूही"। त्यपृच्छदादरपुरःसरं प्रथमः॥ 4

"सुमहान् खलूदधि" रिति। श्रुत्वा प्रथमः प्रसार्य पदयुगलम्।
"उदधेस्तवान्तरालं। किमियद्वे" त्यन्वयुंक्त वैलक्ष्यात्॥ 5

द्वैतीयीकोऽवोच। "न्महत्तरः सागरो ऽतिविस्तीर्णः"।
आकर्ण्याह प्रथमो। वाप्या उत्प्लुत्य तीरतस्तीरम्॥ 6

"किमिया नास्ते वा भो। स्तवोदधि" रिति; द्वितीयमण्डूकः।
स्मित्वाह "तयो मूर्ख! हस्तिमशकयो रिवान्तरं ज्ञेयम्॥ 7

श्रुत्वा कुपितः प्रथमो। रराट "नान्यन्महत्तरं लोके।
मम कूपा;न्माजल्पीः। पिधेहि!तव मुख; मपेहि!दूर" मिति॥ 8

9. मणिविक्रयः

"प्रापय्येदं रत्नम्। विक्रेतुं पण्यवीथिका; मस्य।
मूल्यं कियत्किय त्ते। वणिग्जना ददति विद्धि! गच्छे"ति॥ 1

प्रभुणाऽऽज्ञप्तः प्रेष्यो। गतो ऽददर्श द्रणिग्भ्यस्तत्।
वार्ताकद्वय मस्य। मूल्यं निरणायि शाकविक्रयिणा॥ 2

अभ्यर्थितोऽपि बहुशो। भटेन नैच्छत् स वाणिजो दातुम्।
वार्ताकस्यार्धमपि। ततोऽधिकं; प्राह चैत दतिमूल्यम्॥ 3

परिवृत्यालोक्य मणिम्। सहस्रश उवाच वस्त्रविक्रेता।
"निष्कसहस्रकमेत। न्मूल्यं; क्रीणामि यच्छ! मह्य" मिति॥ 4

आकर्ण्य भटो वणिजम्। प्रार्थयत ततोधिकाय मूल्याय।
अवदद्वणिक् "तदधिकः। काणवराटोऽपि दीयते ने"ति॥ 5

किंकरेण ततो गत्वा। संदधे रत्नविक्रयी।
दृष्टमात्रे मणौ दत्वा। यो मूल्यं लक्षमग्रहीत्॥ 6

स्वशेमुषीविशेषेण । विजानाति महात्मनः ।
वैदुष्यं विदुषो मूल्यम् । रत्नस्येव जनो भुवि ॥ 7

10. पार्थगर्वभङ्गः

स्वस्माद्भक्ततरोऽन्यः। स्वस्मा दन्यस्सुहृत्तरश्च हरेः।
नास्तीति घनीभूतो । गर्वः पार्थस्य हृत्कुहरे ॥ 1

भगवान् सर्वज्ञस्स। रहस्य मेत त्कथं न जानीयात्?
स कदाचि द्वाह्याल्या। अनुसृतपार्थो ऽगम द्बहिर्नगरात्॥ 2

दृष्टः कश्चन विप्रः। पथि; भोज्यं यस्य शुष्कतृण मेव।
किन्त्वास्ते सन्निहिता। खड्गलता सुप्तभुजगीव॥ 3

शष्पाशना त्प्राणिहिंसा। पाप माशंक्य भुज्यते।
शुष्क मेव तृणं तेन। त्वसिना किं प्रयोजनम्?॥ 4

"शरणार्थी शस्त्रधरो। जन" इव शान्तः स परमभागवतः।
असिधेनुकया भीतिम्। जनय त्युपसर्पतां मनुष्याणाम्॥ 5

चरितेन विरुद्धेन । तस्य पार्थः सविस्मयः ।
हरिं पप्रच्छ; तेनोक्तम्। "स विप्रः पृच्छ्यता" मिति॥ 6

सप्रश्रय मुपस्थाय । प्रणम्यैनं धनंजयः ।
अन्वयुंक्ता "ऽङ्ग! शान्तस्त्वम्। किं कार्य मसिना तव?" 7

सोऽब्रवीद् भृकुटिं कृत्वा । खड्ग मुद्धृत्य चालयन् ।
"यदि लब्धोऽवकाशो मे । चतुरो हन्मि दुर्जनान् ॥ 8

नारदः प्रथम स्तेषु । दोषः कोऽस्येति शंकसे ?
अविश्रान्तं स गानाब्धौ । निर्मज्जयति मे हरिम् ॥ 9

निर्घृणः स महापापः । कालाकालौ च नेक्षते ।
स्थाप्यतेऽस्य पुरो बद्धः । प्रभु र्मे स्त्रोत्ररज्जुभिः ॥ 10

'केन भाव्यं द्वितीयेने ?' । त्याशङ्का क्रियते त्वया ।
सा द्रौपद्यविवेकस्य । जन्मभू र्भक्तमानिनी ॥ 11

अनया शठयाहूतः । पुरस्थपात्रान्न मपहाय ।
गत्वा दुर्वास ऋषेः । शापाग्नेः पाण्डवा नावीत् ॥ 12

उपोषिताय सा दुष्टा । तस्मा उच्छिष्टम प्यदात् ।
तेन स्वीक्रियते सर्वम् । स्वदत्तमिति दुर्धिया ॥ 13

'कस्तृतीय' इति ब्रूहि । प्रह्लादः पापवर्तनः ।
येन पित्रा कृतो दण्डः । क्षिप्तो मूर्ध्नि मम प्रभोः ॥ 14

चूर्णितः करिपादाग्रै । स्तप्ततैले निपातितः ।
निगूहितः शिलास्तम्भे । तेन स्वामी हरि र्मम ॥ 15

'कस्तुरीय' इति श्रोतु । कामोऽसि खलु; सोऽर्जुनः ।
रथयन्ता कृतो येन । दुर्मदेन मम प्रभुः" ॥ 16

इति प्रत्युत्तरं श्रुत्वा । स्वात्ममानित्व मत्यजत् ।
पार्थोऽमंस्त च तं विप्रम् । स्वस्माद्भक्ततरं हरेः ॥ 17

11. तरणोपायः

तरंति यात्रिका नाव्याम् । तालदघ्नीं क्वचिन्नदीम् ।
कश्चिदास्ते ब्राह्मणोऽपि । येषु षट्छास्त्रपारगः ॥ 1

आमूलाग्रं तस्य । श्रुतिस्मृतिपुराणशास्त्रसंघातः ।
कण्ठस्थो येन दिवा । निश मुत्स्वप्नायते स तद्गाथाः ॥ 2

श्रुतिस्मृतीः शास्त्रपक्ती । श्चेद्धृत्योदाहरत्यसौ ।
महद्भिरपि विद्वद्भिः । पुंवाणीति प्रशस्यते ॥ 3

यात्रासहचरैं स्तैस्तै । स्संलपन् स विकत्थते ।
पांडितीं जयपत्राणि । बिरुदांश्च मुहुर्मुहुः ॥ 4

"किमधीता आम्नाया? स्तर्को वेदान्तशास्त्रं वा ।
योगो वा? सांख्यं वा?। त्वये" ति पृच्छन् स नेति तैरुक्तः ॥ 5

यावत्प्रविष्ट मुडुपम् । नदीगर्भं प्रभञ्जनः ।
ताव द्रवौ महाभीलम् । मज्जय न्निव तं प्लवम् ॥ 6

डोलायिते तदडुपे । क्रमशो नद्यां निमग्नभूयिष्ठे ।
विप्रं यात्रिक आह ।"प्लवविद्या शिक्षिता न भवते" ति ॥ 7

"नाधीती वेदेषु ! नच वेदान्ते ष्वहं पठिती ।
प्लवविद्याया मेव । कृती"ति स वदन् क्षणा न्नदी मतरत् ॥ 8

तरणोपायोऽज्ञातः । शुकव द्विद्यास्त्वया परमधीताः ।
तरसि कथं भवसिंधुम् । मग्नोन्मग्नो भवे मूढ !॥ 9

12. गोविन्द दर्शनम्

अज्ञातभर्तृवदना । हन्तैका बालिका विधवा ।
सख्यस्तस्या स्सर्वाः । शृण्वन्ती भर्तृमत्य इति ॥ 1

उपसृत्य पितरमवदत् । "तात! कास्ते पतिर्मदीयः?" इति ।
जातव्यथस्स कथमपि । कबलितशोकोऽब्रवी त्पुत्रीम् ॥ 2

"जाते ! शृणु ! ते भर्ता । गोविन्दो ऽदृश्यमूर्तिरयम् ।
विसृज त्वदृश्यभावम् । साक्षाद्भवति त्वयाहूतः" ॥ 3

हृष्टमनाः पितृवाक्ये । विश्वस्यासौ गता स्वशयनगृहम् ।
द्वारं पिधाय साञ्जलि । बन्धा पतिदर्शनाय सोत्कण्ठा ॥ 4

"प्रिय भर्त ! गोविन्द ! गोविन्द! भवान् समायातु" ।
इत्येकमना स्त सा । समाह्वयन्ती तथा तस्थौ ॥ 5

यावन्नायातोऽसौ । ताव द्गोविन्द ! गोविन्द ! ।
गोविन्देति पुनः पुन। राह्वयदुच्चै रुदश्रुनयना सा ॥ 6

आविर्भूतः पुरस्तस्या । स्तदा गोविन्द आदरात् ।
साक्षाद्भवतिं भगवान् । दर्शनातुरचेतसाम् ॥ 7

13. स्नेह परीक्षा ।

"ब्रह्मसत्यं जगन्मिथ्या । नश्यं दृश्य मिदं जगत् ।
अन्वेहि मा मिदं ध्यात्वा । संसारा त्त्वं विमोक्ष्यसे" ॥ 1

इत्युपदिष्टः शिष्यो । गुरुणाऽभ्यदधात्प्रणम्य "भो भगवन् ।
मम सन्ति दारपुत्राः । पितरौ; चासूं स्त्यजन्ति मह्यं ते ॥ 2

दृढैस्तेषां स्नेहपाशै । र्बद्धो निर्मोक्तु मक्षमः" ।
इति प्रतिवदन्तं त । माचार्यः पुनरब्रवीत् ॥ 3

"ननु याव न्ममत्वं ते । तावदेव मपोहसि ।
महत्तरं ममत्वं ते । तत्स्नेहा दपि च त्वयि ॥ 4

यत्स्निह्यन्ति त्वयि ते । यच्च प्राणांस्त्यजन्ति तुभ्यमिति ।
सा भ्रान्ति मिथ्या वा । जानीषे स्वानुभूत्यैव ॥ 5

स्नेहस्वरूपयाथार्थ्यं । मद्य प्रत्यक्षयामि ते" ।
इत्युक्त्वा घुटिकामेकाम् । प्रदायाचकथ द्यथा ॥ 6

"घुटीयं भुज्यतां गत्वा । गृहं; येन मृतो यथा ।
दृश्यसे; नमृतस्सर्वम् । द्रक्ष्य स्याकर्णयिष्यसि ॥ 7

उपगम्य तदा तत्र । पुनरुज्जीव्यसे मया" ।
इति श्रुत्वा गतः शिष्यो । घुटीं प्राश्य किलामृत ॥ 8

पितरौ दारपुत्राश्च । सखायो बान्धवाः परे ।
विलपन्तो मुक्तकण्ठम् । पर्यवर्तन्त तं जनम् ॥ 9

शिरस्तटं दारयद्भि । स्ताडयद्भि रुरोमुखम् ।
विसृजद्भि र्बाष्पधाराः । सर्वै र्हा हे त्यरुद्यत ॥ 10

"एक एव सुतः पित्रो । र्विद्यावाञ्शीलवान् युवा ।
वर्धिष्यमाण एतादृङ् । न भूतो न भविष्यति" ॥ 11

इत्यश्रुवदनै स्तैस्तैः । शोच्यते प्रतिवेशिभिः ।
दारपुत्रपितॄणां तु । दुःखं किमिति कथ्यते ? ॥ 12

पितु रुच्चै र्मात्रा चा । त्युच्चै र्मातुरपि तस्य च कलत्रेण ।
अनुमरणमेव शरणम् । ममेति रुदितं कृतं बताविरतम् ॥ 13

इत्थंभूते वस्तुनि । तत्रायातो जनः कश्चित् ।
श्रुततच्छोकोदन्तः । शनैः शनै स्तं मृतं नरं प्राप्तः ॥ 14

तस्य नाडीं परीक्ष्यासौ । मृत स्याप्तानभाषत ।
"प्रमीतो दृश्यमानोपि । पुनरुज्जीवितो भवेत् ॥ 15

अस्ति दिव्यौषधं येन । मुहूर्ताद्धारय त्यसून्" ।
श्रुत्वेदं शान्तदुःखा स्ते । साक्षाद्देवं तमस्तुवन् ॥ 16

अथ तूष्णीमवस्थाय । क्षणं विप्रोऽवद त्पुनः ।
"भुज्यतां येन केनापि । घुटीयं तेन जीव्यते" ॥ 17

इति तद्वचनं श्रुत्वा । सर्वेऽहंप्रथमिकाभाजः ।
परिवव्रु रौषधार्थम् । यदा तदाऽवाद्यनेन पुनरित्थम् ॥ 18

"नूनं स्निह्यन्त्यस्मिन् । विजीवितेऽतीव सर्वेऽपि ।
दातुं स्वप्राणानपि । तस्मै यूयं हि सन्नद्धाः ॥ 19

अवधत्त ! संशृणुध्वम् ! । येन घुटी भुज्यते प्रमीतकृते ।
म्रियते सद्यः स परं । त्वेष मृतो जीवति क्षणादेव" ॥ 20

यावच्छ्रुतं वचस्त । ताव द्ये सन्ति सन्निहिताः ।
भैषज्य भक्षणार्थम् । तैः पश्चात्कृतपदैः स्थितं दूरे ॥ 21

अथ तस्य मृतस्य पिता । ऽहूतो भैषज्यभक्षणाय तदा ।
अवद् "द्धोः सन्नद्धो । हातुं प्राणान् सुतस्यार्थे ॥ 22

किन्त्वस्ति प्रतिबन्धो । नहि चलतीषत्कुटुंबचक्रं मे ।
यदि नस्यां; नैकोऽपि । किंकिं कुत्रास्ति वस्तु जानाति"॥ 23

माता तस्य तदावोचत् । "सज्जा मर्तुं सुताय मे ।
किन्त्वस्ति कोऽप्यन्तरायो । गर्भिणी मम पुत्रिका ॥ 24

तस्याः प्रसूतिकातन्त्रम् । मदन्या काऽत्र निर्वहेत्? ।
मम मृत्युं समाकर्ण्य । सा म्रियेत तपस्विनी ॥ 25

तत्कलत्रं ततः प्राह । "स्त्रीणां सर्वाधिकः पतिः ।
पतिशून्यं जीवितं मे । निर्गन्धकुसुमायते ॥ 26

मृता स्यां यदि मे भर्ता । जीवन्नन्यां ग्रहीष्यति ।
कोनु रक्षेदस्फुटाक्षान् । क्षीरकण्ठान् शिशूनिमान्?" ॥ 27

इति सर्वाः कथाः श्रुत्वा । मृतोऽयमिति चिन्तितः ।
उत्थाय प्राञ्जलिः शिष्यो । गतभ्रान्ति र्गुरुं नतः ॥ 28

14. अर्धज्ञान मनर्थाय

"इदं जगद्ब्रह्ममयम् । सर्वे ब्रह्मस्वरूपिणः ।
अय मद्वैतसिद्धान्तो । राजन्! चित्तेऽवधीयताम्" ॥ 1

इत्युपदिष्टो गुरुणा । वेद्यं सर्वं विदित मिति ध्यायन् ।
सन्निहितां निजमहिषीं । राजा वीक्ष्यैकदा जगादैवम् ॥ 2

"इदं जगद्ब्रह्ममयम् । सर्वं ब्रह्मस्वरूपिण: ।
मिथ्या खलु ततो भेदो । राज्ञीदास्यो स्तु तत्त्वत:" ॥ 3

इत्युक्त्वा क्षणमास्थाय । स निश्शंक मभाषत ।
"अद्यप्रभृति दासी ते । राज्ञीभवितु मर्हति" ॥ 4

इत्यशनिघातसदृशम् । वचनं श्रुत्वा विमुह्य सा देवी ।
प्रतिवचनमप्यदत्वा । मूकेवावस्थिता चिरं तत्र ॥ 5

ततो दूत्या समाहूत माचार्यं प्रणिपत्य सा ।
प्राप्ततत्त्वोपदेशस्य । कथां पत्यु र्न्यवेदयत् ॥ 6

उपदिष्ट: सदर्थोऽपि । कदर्थोऽनधिकारिणि ।
विपरीतगुणं सूते । भैषज्य मशितं क्वचित् ॥ 7

गुरु राश्वासयन् राज्ञी । मन्नूताद्याम्ब ! भुज्यते ।
मया त्वन्मन्दिरे भर्तु: । पंक्तौ; किन्त्विद माचर" ॥ 8

इति कर्णेऽस्या: कश्चि । न्मन्त्र मुपादिक्ष दाचार्य: ।
यस्यपुरश्चरणार्थम् । स्वगृहस्याभ्यन्तरं गता देवी ॥ 9

अश्नतो: पात्रयो राज । गुर्वो: प्रभ्वी समागता ।
न्यास्थद्गोमयपिण्डं यम् । दृष्ट्वा राजा ऽजुगुप्सत ॥ 10

धिग्धिगि त्युच्चरन् याव । दुत्प्रपश्यस्स उत्थित: ।
तावत्स देशिको ऽवादीत् । "को भेदो गोमयान्नयो: ? ॥ 11

इदमन्नं गोमयं च । ब्रह्मरूप मसंशयम् ।
यथा दासी च राज्ञी च । ब्रह्मैवेत्यवगम्यते" ॥ 12

घृतधारया यथाग्नि । स्समुज्ज्वलन् क्रुद्धपूर्वोऽयम् ।
अवधीरणयाचार्यम् । "त्वमिदं भुङ्क्ष्वे त्यगर्जदत्युच्चैः ॥ 13

गुरु रवद "द्वौ भुंजे । वीक्षस्वा" द्येति पश्यति स पत्यौ ।
मुकुलितवदने गुडवत् । सुखेन कबलीचकार त पिण्डम् ॥ 14

दृष्ट्वा सिद्धाद्वैतभावम् । तमाचार्यं स भूपतिः ।
सलज्जः प्रणिपत्याह । "भगवन् ! क्षम्यता" मिति ॥ 15

15. योगप्रभावः

चिरेण तपसा क्रीता । अमोघा योगशक्तयः ।
केनचि द्योगिना ब्रह्म । रथेनोह्यत एव यः ॥ 1

कृता हि क्षेत्रिया रोगाः । शान्ता मन्त्राम्भसा नृणाम् ।
भस्मधूल्या भूतपीडा । विषो मन्त्रै रपास्यते ॥ 2

कृतहस्तो जलस्तम्भे । वाय्वग्निस्तम्भयोरपि ।
न कथं शस्यते लोके । दिव्ययोगीति तादृशः? ॥ 3

मूत्रेण ज्वाल्यते दीपः । सुगन्धिः क्रियते च विट् ।
निवार्यते ह्यचलनम् । तत्सिद्धत्वं ब्रुवन्त्यमी ॥ 4

दत्तै रुपायनैर्भक्तैः । शिष्यै श्चास्मै दिने दिने ।
भूतपूर्वः कुटीरोऽद्य । जातं सौवर्णमन्दिरम् ॥ 5

कुहनाविप्रो भगवान् । कदाचि दुपसृत्य योगिवरम् ।
अभियुक्त स्तद्गोष्ठया । मकुण्ठितं तन्महत्त्व मस्तावीत् ॥ 6

अवदच्च ततो "भगवन्! चापल्यं क्षम्यतां; बहोः कालात्।
अभिलष्यते मयाते। प्रत्यक्षं योगशक्तिमवगन्तुम् ॥ 7

दृश्यतामित आयाति। गच्छच्छैलोमतंगजः।
किमयं भवतो योग। प्रभावेन मृतोभवेत्?" ॥ 8

श्रुत्वैतां प्रार्थनां योगी। कियदेतदिति ब्रुवन्।
व्यकिरद्धसितं; येन। गजः क्रन्दन् मृतोऽपतत् ॥ 9

स गत श्चित्रं नाम। स्तुवन् प्रभावं सहस्रशः प्राह।
"भगवन्! पुनर्गजोऽयम्। जीव"त्विति;सद्यएव स प्राणीत् ॥10

माया योग्यवदद्भोः। कियच्चिरं भगवता तपस्तप्तम्?"
येनादृष्टश्रुतचर। ईदृग्दिव्यप्रभाव उपलब्धः॥ 11

अपनीयतां महात्मन्! शंका मे मारितः क्षणेन गजः।
पुन रकृतलब्धजीवः। किमनेनासाद्यते मोक्षः? 12

इत्युक्त्वा प्रतिवचनं तस्यालब्ध्वा निरीक्ष्य च मुहूर्तम्।
प्राप्तोऽदृश्यत्वं स। व्यरमत्तत्प्रभृति योग संरम्भात् ॥ 13

16. कौपीनरक्षणम्

न वाति नरगन्धोऽपि। यत्र ग्रामबहिस्तटे।
सृष्ट्वाश्रमं कोऽपि भिक्षु। र्वीतरागोऽवसत्पुरा ॥ 1

प्रतिबुद्धः कुक्कुटेन। स्नात्वा निर्झरवारिषु।
धृत्वा कौपीनमेवाय। मामध्याह्नं तपस्यति ॥ 2

तद्वैराग्यं तपस्तस्य। वीक्ष्य धन्यत्वकांक्षिभिः ।
अहंप्रथमिकाभाग्भि। र्भिक्षा पौरैः समर्प्यते ॥ 3

स भिक्षार्थं बहिर्गत्वा। यावदायाति; मूषकः।
तावत्कौपीन मेतस्य। कल्पयामास खण्डशः॥ 4

परेद्युरेवमेवाभू । दपरेद्युश्च तत्तथा ।
कौपीनस्यापि दारिद्र्या। दभूद्भिक्षु रकिञ्चनः॥ 5

भिक्षया सह कौपीन । स्यार्थिनं कोऽप्युपादिशत् ।
"बिडालः पुष्यतां यस्मा । दाखोः पीडा निवर्तते"॥ 6

अभिनन्द्य तमुपदेशम् । गत्वा सद्यः पुरे परिभ्रम्य ।
आनीय बिडालार्भक। मवर्धय द्याचितैः क्षीरैः॥ 7

दिव्यं तत्सुमुहूर्तम् । यस्मिन् मार्जालपादनिक्षेपः।
आश्रमभुवि; तत्प्रभृति। गताखुपीडः स आप सुखनिद्राम्॥ 8

विवराद्बहिरागच्छन् । दृष्टो मार्जालकेन बिभ्यदयम् ।
प्रविशत्यन्तः; पश्यति। मुहुर्मुहुर्विवरतः समुत्थशिराः॥ 9

यथावदास्ते कौपीनम् । मूषकास्पृष्ट मातपे ।
स तपस्वी बिडालं त । ममन्यत तपः फलम्॥ 10

उपरम्य जपाद्विप्रः । पश्यन् मार्जालशावकक्रीडाः ।
हसति पुनर्जपति; पुनः। पश्यति; हसति च; निमीलयति च
दृशौ॥ 11

एवंविधया ह्रस्वम् । क्रमाद्ध्रसीयो ह्रसिष्ठं च ।
भवतिस्मान्ते चाभूत् । प्रलुप्तभूयिष्ठमेव तस्य तपः॥ 12

अवसन्नायां रात्रौ । प्रबुध्यमानेन पात्रहस्तेन ।
तेन पयोऽर्थं प्रत्यह । मटाध्यते प्रतिगृहं ग्रामे ॥ 13

द्वित्राण्यहानि दत्तानि । तस्मै क्षीराणि याचितैः ।
नेत्यवाचि तुरीयेऽह्नि । गम्यतामिति पञ्चमे ॥ 14

"यथाकथंचि द्यच्छाम । भिक्षां तुभ्यं; कुतः पयः ।
आनीयते बिडालाय ? क्रीयतां गौः पयस्विनी ॥ 15

पर्याप्तं पीयतां क्षीरम् । बिडालेन च पाय्यताम् ।
दैनिकोऽयं पादयात्रा । क्लेशस्ते व्यपनीयते" ॥ 16

इत्यादिष्टो गृहस्थेन । केनचिच्चिन्तयन्निदम् ।
स बाढमिति गां क्रेतुम् । कथंचिद्धृदयेऽकरोत् ॥ 17

पथिकात्परलोकस्य । कस्मैचिद्दातुमिच्छतः ।
प्रत्यग्रहीद्धेनुमेकाम् । मृतकल्पां धरामरः ॥ 18

पुण्यतस्तस्य गोधेनु । जीविताऽश्रमशाद्वले ।
चरंती स्वेच्छया जाता । पीवरांगी घटोध्न्यपि ॥ 19

सायं प्रातश्च पर्याप्तम् । क्षीरं तस्मै प्रयच्छति ।
यत्पीत्वा विप्रमार्जालौ । पीनौ जातौ दिनक्रमात् ॥ 20

रजन्यामप्रबुद्धायाम् । प्रबुद्धो दोग्धि तत्पयः ।
मार्ष्टि गोष्ठं; तृणंश्छिन्ते । तत्क्रियास्वेव गाहते ॥ 21

लीढभूयिष्ठमभव । द्बिडालेनैव तत्पयः ।
अवशिष्टं यत्तदद्य । कबलीक्रियते गवा ॥ 22

स पतत्याश्रमप्रांत । पल्लीग्रामेष्वनेकशः ।
गोग्रासार्थं; पीडितैस्तै । र्दीयते त्वल्पशोऽल्पशः ॥ 23

याच्ञार्थमागतं पश्यन् । कोप्याह भ्रुकुटीमुखः ।
"ननु दत्तं मया ते ह्यो । गम्यता" मित्यवज्ञया ॥ 24

अपरेद्युः कश्चिदाह । "ब्राह्मणाहिण्ड्यते कुतः ?
प्रतिग्रामं प्रतिदिनम् । यस्मै कस्मैचिदर्थिना ॥ 25

क्रीणीहि क्षेत्रखण्डं य । त्प्रसूते सर्वसंपदः ।
पुष्णात्वीदृग्गोसहस्रम् । भुङ्क्ष्वां; दत्तां; स्वयं भवान् ॥ 26

इत्युक्तमात्रो विप्रोऽसौ । सम्यक्सञ्चित्य तद्वचः ।
गत्वाश्रमप्रांतदेशम् । वशीचक्रे परेद्यवि ॥ 27

उद्धर्तुं कण्टकान् क्षेत्रात् । कृष्टुं वप्तुं ततः क्रमात् ।
सस्यानां वर्धनाद्यर्थे । न्ययुंक्त च भटान् बहून् ॥ 28

कृषिकर्मसु निर्मज्जन् । उन्मज्जंश्च प्रतिक्षणं ।
शिरोदघ्नेषु विप्रस्स । यत्रकुत्राप्यटाट्यते ॥ 29

यत्किंचित्कार्यार्थम् । दिने दिने कुत्रचित्प्रयातस्य ।
प्रविलंब्य गृहायात । स्याऽस्यान्नं कोऽपि नास्ति सज्जयितुम् ॥30

अन्यमुपायमपश्यन् । युवतीकरमग्रहीः; त्तत स्तेन ।
निरमायि रम्यसौधः । स्पृहणीयसमस्तवस्तुसंपूर्णः ॥ 31

नियुक्ताः किंकरा स्तेन । किंकर्यश्च शतं गृहे ।
तत्क्षेत्रं सूयते स्वर्णम् । सामंतोऽस्तेऽभवद्यतिः ॥ 32

असंलब्धावकाशेन । स्नातं तसं न तेन धिक् ।
मलकूपस्थकृमिवत् । सोऽयं जीवति संसृतौ ॥ 33

आचार्येण कदाचित् । पृष्टो नत्वा सलज्जं सः ।
कौपीनरक्षणार्थं । मयं पटाटोप इति समाधत्त ॥ 34

"गुरुदेव ! प्रसीदात्र । वस ! गृह्णन् मत्कृताथिथेय" मिति ।
प्रार्थितवन्तं शिष्यम् । न्यक्कृत्य यथेऽछमेव गुरुरगमत् ॥ 35

17. सर्वं विष्णुमयं जगत्

कृतगुरुबोधः "सर्वम् । विष्णुमयं जग" दिति प्रबुद्धमतिः ।
साक्षात्कृतधर्मा कोऽ । प्यगमत्परिहाय गेहमात्मीयम् ॥ 1

न परस्यात्मना किंचि । न्नपरेणात्मनोऽपि च ।
श्वानं विप्रं च मनुते । हरिरित्येव संचरन् ॥ 2

अयमव्याजं शिशुरिव । हसन् प्रमत्त इव दिक्तटान् धावन् ।
क्रन्दन् भूताविष्टो । यथा जनैश्चिंतितो मतिभ्रष्टः ॥ 3

पर्यटते रथ्यासु । साध्वी काचित्कृपावती तस्मै ।
अददादोदनपिंडम् । यमयं गृह्णन् गतस्तरोर्मूलम् ॥ 4

अश्नतस्तस्य पात्रेऽन्नं । भुंक्ते कश्चन कुक्कुरः ।
दत्त्वैकं कबलं तस्मै । तेनैकं भक्षितं मुदा ॥ 5

अवलोक्य तं हसत्सु । जनेषु मत्तोऽयमितिकृत्वा ।
सोऽब्रूत "हरेः पार्श्वे । हरिरुपविष्टोऽन्नमश्नाति ॥ 6

भो भो यूयं हरयो । वृक्षा हरयो; विहंगमा हरयः ।
हरयः पशवश्च; विना । हरिं न किंचिदपि दृश्यते लोके"॥ 7

18. दारदासः

सेवाभ्यर्थी कश्चन । विप्रकुमारः सुरालयानिव धिक् !
कार्यालयाननुदिनम् । प्रदक्षिणीकृत्य निर्याति ॥ 1

तत्र प्रतिष्ठितो देवो । नादातस्मै स्वदर्शनम् ।
स तपस्वी स्थितो दूरा । दभिवादयते मुहुः ॥ 2

यद्यपि तथापि कथमपि । सन्दृश्य महाधिकारिणं कमपि ।
स्वीयान् व्यजिज्ञप त्स । दुर्भरदारिद्र्यदेवताविकृतीः ॥ 3

प्राचीकटद्वयां श्रुत्वा । कथां हृदयदारिकाम् ।
परेभ्योऽयं खलु श्रेया । नन्धात्केकरदृग्यथा ॥ 4

संलप्य सुधामधुरै । र्वचोभिरन्तेऽधिकार्यवदत् ।
"नापेक्षितो नियोज्यो । ममाधुना; पश्य ! मां पुन" रपीति ॥ 5

अपरेद्युरागतं तम् । "न मेऽद्य संभाषणावकाशोऽस्ति ।
पुनरायाहि ! श्वो वा । परश्व" इत्यब्रवीत् ; स गतः ॥ 6

एवं सेवालुब्धो । निरशन उच्छूनपाद युग्मः सः ।
कार्यालयस्य सततम् । प्रदक्षिणानाचरत्येव ॥ 7

निष्फलांस्तस्य यत्नांस्ता । नूषरक्षिप्तबीजवत् ।
दृष्ट्वा सुहृत्कोऽप्यवादीत् । "कियान् मूर्खोऽसि रे! सखे! ॥ 8

जनश्रुतिः श्रूयतेऽत्र । दारदासोऽधिकार्यसौ ।
आराधिता देवता सा । त्वनुगृह्णाति ते वरम् ॥ 9

अल मन्यैः प्रयत्नै र्भो । गच्छाद्यैव तदंतिकम् ।
सत्यं श्वो वा परश्वो वा। बहुना किं? नियोक्ष्यसे" ॥ 10

इत्यादिष्टमहामन्त्रः । शतच्छिद्रपटं दधत् ।
बुभुक्षार्तः शुष्कवक्त्रो । ऽपश्यद्देवीं नियोगिनः ॥ 11

श्रुत्वा सा शोच्यकथां । द्रुतहृदयाऽश्रूणि मुञ्चन्ती ।
यत्किमपि दातुमैच्छत्; । परंन्त्वनिच्छन् ग्रहीतुमयमवदत्॥ 12

"अनपेक्षित मम्ब ! धनम् । प्रसीदानुगृहाण ! माम्" ।
इत्यूचिवांसं देव्याह । "मया किं क्रियतां भण !" ॥ 13

"अम्ब ! भवद्वाक्साह्यम् । मदपेक्षितम ; स्त्वहंतु सेवार्थी; ।
अनुगृह्यतां यथाहं । भर्त्रा तव जीविकाप्राप्तः" ॥ 14

इत्युक्तमात्रा देव्याह । "किमियन्मात्र मेव वा? ।
प्रभुं वक्ष्याम्यद्य रात्रौ । प्रातरागम्यता" मिति ॥ 15

परेद्युः प्रातरागत्य । दृष्ट्वा तौ दम्पती पुरः ।
पुष्पोद्याने संचरंतौ । प्रणमन् दूरतः स्थितः ॥ 16

आहूय भर्ता ब्रूते स । "लेखक स्त्वं नियोजितः ।
कार्यालये मदीयेऽद्या । रभ्यैवायाहि सज्जितः" ॥ 17

इत्युक्त स्स गजारूढ । इवात्यानन्दतुन्दिलः ।
कार्यालय मगच्छद्यम् । तदध्यक्षाय दर्शयन् ॥ 18

भतीऽह्या "ऽयं कुशलः। क्रियासु; शान्तो; युवा; ऋजुप्रकृतिः।
अत्र नियुक्तो"ऽद्ये ति । तेनाभिहितं च "बाढ" मेवेति ॥ 19

नाचीचल द्भर्तृचित्त । मार्तकण्ठस्वर स्तथा ।
अचीचल त्स्वदाराणाम् । कलकण्ठस्वरो यथा ॥ 20

19. पणबन्धः

क्रीडन्तौ पुरतो मातु । र्गजाननषडाननौ ।
वीक्ष्यास्पृहयतां कण्ठ । हाराय युगपत्तदा ॥ 1

अवदज्जननी "भूमिम् । प्रदक्षिणीकृत्य मां प्रथमम् ।
प्राप्तो ग्रहीतुमर्हति"। श्रुत्वेद मगच्छतामुभौ पुत्रौ ॥ 2

स्कन्दो मयूरमारूढः। प्रस्थितो नथसः पथि ।
गत्वा द्वैमातुरोऽकार्षी । ज्जनयित्र्याः प्रदक्षिणम् ॥ 3

कृतकृत्यं प्रणमन्तम् । विलोक्य पुत्रकमदा दम्बा ।
तावत्स्वग्रैवेयम् । न यावदायाति षण्मुख स्तत्र ॥ 4

फेनायमानवदनः । स्विन्नांगः स्कन्द उपसृत्य ।
दृष्ट्वा कण्ठे भ्रातु । र्हारं संभ्रांत इदमवदत् ॥ 5

"अम्ब ! लम्बोदरो भ्राता । वाहनेनाखुना कथम् ।
भूमिं प्रदक्षिणीकृत्या । ऽकालहीनं स आगतः ?" ॥ 6

गजमुख आह "शृणु ! भो । माता गर्भस्थवेधोऽण्डा ।
जननीप्रदक्षिणेन हि । सिद्धप्रायं प्रदक्षिणं भूम्याः" ॥ 7

20. सर्वे जन्तव ईश्वररूपिणः

"सर्वान् जन्तून् पदार्थांश्च । निश्चित्येश्वररूपिणः ।
प्रणम्यन्ता" मिति च्छात्र । बृन्दं गुरुरुपादिशत् ॥ 1

आहर्तुं समिधः कश्चि । च्छात्रो यावद्वनेऽटति ।
तावच्छ्रुत "मपेत ! द्रा । ग्गजो मत्तोऽभिधावति" ॥ 2

इत्याकर्ण्य वचः सर्वे । विना छात्रेण केवलम् ।
मत्वा तं मूर्तिमन्मृत्युम् । जङ्घाबलमुपाश्रयन् ॥ 3

अभिधावन्तं करिणम् । परमेश्वरमेव निश्चित्य ।
छात्रः प्राञ्जलिरस्तौत् । "सहस्रशीर्षा पुरुष" इति महोच्चैः॥ 4

" रे ! रे ! अपेहि ! दूरा । दपेह्ययमकालमृत्युरायाति " ।
इति घोषितमपि शतशो । हस्तिपकेन, स्थितोऽश्मवगणयन् 5

उपधाव्य मदेभेन । तुण्डाग्रेण समुद्धृतः ।
दूरोत्क्षिप्तो भग्नशल्योऽ । पतच्छात्रः शिलातले ॥ 6

तदवस्थममुं श्रुत्वा । सर्वे सब्रह्मचारिणः ।
तत्रागत्य सहाचार्याः । शोचन्त स्त मुपाचरन् ॥ 7

आचार्य आह "भद्र! हस्तिपककृतापसारणोऽपि भवान् ।
नापसृतः कुत ? इय म । ध्यापतिता दुर्विपत्त्वयानीता" ॥ 8

श्रुत्वेदमाह शिष्यो । "भवद्वचः सर्वजन्तु रीश इति ।
कृत्वा प्रमाणकं धिक्! । हतोऽस्मि तुन्दिल इवापगामध्ये"॥ 9

आकर्ण्य गुरुः प्राह । "यथा करी निश्चित स्त्वयेश इति ।
हस्तिपकोऽपि तथैव । निश्चेयोऽ स्त्येव रे ! मूर्ख !" ॥ 10

द्वितीयो भागः

1. एकलव्यम्

1

आजानुबाहु युगल । ओजस्तेजस्समुद्भमत्कायः ।
उज्ज्वलकपाटवक्षा । यात्येको मूर्तिमद्वीर्यम् ॥ 1

करयोश्शरा, श्शरास,। स्तूणीरं पृष्ठके, गलेऽविरले ।
गुञ्जासरा, श्चकाशे । कट्यां हरिणाजिनाम्बरं यस्य ॥ 2

आगत्यायं भक्त्याऽ । चार्यद्रोणस्य पादयोः पतितः ।
अवद "दहमेकलव्यो । हिरण्यधन्वाख्य वनचरेन्द्रसुतः ॥ 3

धनुर्विद्याऽध्यापिता मे । तातपादैः मयाऽधुना ।
विद्यानिष्णातामाप्तुम् । प्राचार्यः प्रविचीयते ॥ 4

धनुराचार्यैः सर्वै । र्भवान् स्तुत श्चापवेदनिष्णातः ।
प्राप्तव्य इत्यवोच । न्नाशंसे शम्यतेऽत्र तृष्णेति ॥ 5

आचार्यदेव ! भवदा । ज्ञप्तः पितृशिक्षितां धनुर्विद्याम् ।
इच्छामि दर्शयितु" मिति। ब्रुवाण मुत्थाप्य तं गुरु रगादीत्॥ 6

"अयि ! बाल ! व्यपदिशसि । किरात इति; वेदवद्धनुर्वेदः ।
नोच्चार्यते मन्त्राः। संस्कृतिबाह्यै र्जनै र्यथाविहितम् ॥ 7

स्वरवर्णहीनमन्त्रा । न केवलाऽपेक्षितालाभः ।
अनपेक्षितं च लभसे । कूपात्खनकः पिशाचमिव घोरम् ॥ 8

नाध्याप्योऽत्र धनुर्वेद । स्तृष्णा तव न शाम्यति ।
अलमन्यथा विचिंत्य । हितैषी कथयामि ते" ॥ 9

श्रुत्वैत देकलव्यो । भग्नाशो ऽत्यन्तदूनात्मा ।
प्राञ्जलिराज्ञां गन्तुम् । द्रोणमयाचिष्ट शीर्षमवनम्य ॥ 10

बाष्पायमाणनयनम् । दीनास्यं तं गुरु र्वीक्ष्य ।
स्निग्धो यदृच्छयाह । "युञ्ज्वेष्टेन भो स्त्व" मिति ॥ 11

2

संकुचितविकृतवदनम् । नेत्रे पर्यश्रुणी, दृशं शून्याम् ।
दधता स्थितं कुटीरो । पांते केनाऽपि दग्धचित्तेन ॥ 12

"भजन् द्रोणं शिष्यवृत्त्या । भवेयं तदनुग्रहात् ।
सुधन्वेति दिवारात्रम् । मयोत्स्वप्नायितं भृशम् ॥ 13

धिक्कष्टं ! हतदैवम् । मनोरथस्य मम मूलमुत्पाट्य ।
सिञ्चत्युष्णजलै र्बत ! कांक्षितसिद्धिः कथंन्वपुण्यानाम् ? 14

नास्त्यधिकस्तुल्यो वा । द्रोणस्येति प्रशंसन्ति ।
अन्यत्रास्मात्तीर्थात् । तृष्णा मे शम्यते कुत्र ? ॥ 15

न मया शक्यमवाप्तुं । वृक्षाग्रफलं यथा धनुर्विद्या ।
क्रियतेऽत्र मुधा ग्रीवा । प्रसारण मूढचित्तेन" ॥ 16

इति शोचत उच्छ्वसतो । नैराश्या देकलव्यस्य ।
व्यद्योतत विद्युदिव । कश्चिद्भावो हृदाकाशे ॥ 17

अविलंबितमुत्थाया । सनात्समानीतपङ्कमृत्तिकया ।
निरमायि द्रोणस्य । मूर्तिस्तेनाञ्जसा मुहूर्तिर्धे ॥ 18

समासीनः पुरस्तस्य । पत्रैः पुष्पैरपूपुजत् ।
प्रदक्षिणनमस्कारा । नाचचार मुहुर्मुहुः ॥ 19

अभ्यस्यति यावदयम् । शरान् पुरो विग्रहस्य, चित्रमिदम् ।
तावत्स्फुरंति चित्ते । तदस्त्रविद्यारहस्यानि ॥ 20

शिक्षयति गुरुर्यद्यत् । पाण्डवान् हस्तिनापुरे ।
धनुःशास्त्रे दविष्ठोऽपि । तत्तत्सर्वं निशाम्यति ॥ 21

अर्चिता प्रतिमा तस्य । प्रणतस्य शिरस्तटे ।
हस्तमाधाय वक्तीव । "त्वं सिध्ये" त्यस्त्रकर्मणि ॥ 22

भगवान् द्रोणाचार्यो । दृष्टः स्वप्नेषु तस्य रजनीषु ।
उपदिशति मन्त्रविद्या । अध्यापयति प्रयोगतंत्रांश्च ॥ 23

"अर्चता प्रतिमामेवम् । मयाप्ता कृतहस्तता ।
साक्षाद्गुरूपदिष्टास्ते । कियत्कौशलमाप्नुयुः ? ॥ 24

न कृतं तावत्पुण्यम् । मये " ति हर्षं कृतार्थतया ।
शोकं चापुण्यतया । आतपवर्षाविवाप समकाले ॥ 25

"भो गुर्वाशीर्वचसः । फलं मयाप्त" मिति स कृतज्ञः ।
"छित्वाऽप्यंगं देयाऽ । वश्यं गुरुदक्षिणे" त्यकृत मनसि ॥26

3

शिक्षमाणं लक्ष्यभेदां । स्तं समासद्य कुर्कुरः ।
वने व्यक्षेपयच्चित्तम् । बुक्कनैः कर्णकर्कशैः ॥ 27

तर्जनै र्भर्जनै र्वापि । न चलन्नीषदुच्चकैः ।
श्वा बुक्कति स्म; येनायम् । भ्रष्टलक्ष्यो ऽभवन्मुहुः ॥ 28

व्याधेन व्यधितेन । सप्त शराः कुप्यता सकृत्क्षिप्ताः ।
संलग्नाः शुनकमुखे । विचित्रचित्राकृतिं विदधतिस्म ॥ 29

शरविद्धः श्वा क्रन्दन् । प्रतिध्वनन्तीषु दिक्षु परिधावन् ।
विसृजन् लालाः पश्चा । त्पश्यन् पश्यन् पलायनं चक्रे ॥ 30

वनेऽत्यध्वं तत्र तत्र । पर्यट्य शुन मागतम् ।
शरचित्रमुखं वीक्ष्य । पाण्डवा विस्मयं ययुः ॥ 31

शरशिल्पं श्लाघमानाः । स्तुवाना हस्तकौशलम् ।
धन्विनं श्वाविधं द्रष्टु । कामास्ते प्रस्थिता स्ततः ॥ 32

पर्यटद्भि ररण्यान्याम् । तैर्निषादो विलोकितः ।
कुत्रचिन्मृण्मयद्रोण । मूर्त्यग्रे शरशिक्षणः ॥ 33

आत्मानं गोपयन्तस्ते । पश्यन्तस्तस्य कौशलम् ।
दृग्भारभूतं चापस्य । शुष्कास्या अतपन् हृदि ॥ 34

निशाता एकलव्यस्य । बाणा लक्ष्यं न केवलम् ।
किन्त्वलक्ष्यं फल्गुनस्या । प्यच्छिन्दन् हृदयं बत! ॥ 35

गताः कथंचिद्व्याधस्य । पुरः स्थित्वा तमब्रुवन् ।
"कस्त्वं? ते व्यपदेशः कः? । क्व वासोऽ स्त्रगुरुश्च कः ?"॥ 36

4

इति पृष्टः प्रत्यवादीत् । "भ्रातरः! श्रूयतां; मम ।
नामैकलव्यो; व्याधोऽहम् । वास्तव्योऽत्रैव कानने ॥ 37

भगवांश्चापाचार्यः । शैलानां मेरुवत्समुत्तुङ्गः ।
शस्त्रभृतां; कीर्तिधनो । द्रोण; स्तत्पादशिष्यरेणुरहम्" ॥ 38

मर्मवेधिशरेणेव । तदाख्यानेन ते हताः ।
जग्मु स्त्यक्त्वा पाण्डवास्तम् । तत्तेजोविमुखीकृताः ॥ 39

व्याधस्य तेजसा जातो । व्रणो हृदि किरीटिनः ।
क्षते क्षारमिवाद्यासीत् । द्रोणस्याचार्यकं श्रुतम् ॥ 40

ततश्चित्तेन दग्धेन । पार्थोऽगच्छत् स्वमंदिरम् ।
उपगत्य द्रोणमेवा । वोचद्भ्रुकुटिताननः॥ 41

"भवता प्रतिश्रुतं मे । 'कुर्यां ककुदं धनुर्धराणां त्वाम् ।
ऋत' मिति; मृषोद्यमेत । त्त्वतिसर्वः कोऽपि दृष्टोऽद्य ॥ 42

अयं किल भवच्छिष्यो । न कदापि त्वयोदितः ।
कश्चिदस्तीत्यद्ययावत् । किं ते लभ्यं प्रतार्य माम् ॥ 43

अतिशेते स धानुष्को । नहि मामेव केवलम् ।
परंतु त्वां त्वदाचार्यो । स्तदाचार्यांश्च हेलया" ॥ 44

इति मर्माविधं वाचम् । ब्रुवाणं क्रुद्धमानसम् ।
प्रतिवक्तु मजानन् स । स्थितस्तूष्णीक उन्मनाः ॥ 45

शनैः पार्थो निषादस्य । धनुषः पारदृश्वताम् ।
लाघवंचापि हस्तस्य । विस्तरेण न्यवेदयत् ॥ 46

स्वात्मानमनुसृतवते । समर्चितां तां धनुर्गुरवे ।
प्रतिमां, प्रणम्य च शरा । नभ्यस्यन्तं किरात मदद्‌र्शत् ॥ 47

5

अवलोक्य गुरुं दूरात् । प्रत्युद्गम्यांघ्रिपद्मयोः पतितः ।
प्रक्षाल्य हर्षबाष्पैः । स एकलव्यो दृढाभक्तिः ॥ 48

दत्वा तस्मा अर्घ्यपाद्ये । उपवेश्य मृगाजिने ।
वीजयन् गतखेदं त । मात्मनोऽशुश्रवत्कथाम् ॥ 49

विज्ञाय तस्य भक्तिम् । द्रोणोऽभिनिविष्टतां, धनुःशास्त्रे ।
निष्णाततां च शंसन् । परामृशच्चांगकं स्निग्धः ॥ 50

प्राञ्जलिरवद व्याधो ! "भगवन् ! सुप्रात मद्य पुण्याहम् ।
चिरसंचित मात्मीयं । भाग्यं फलित मिति निश्चिन्वे ॥ 51

व्यथते त्वात्मा साक्षा । त्त्वदंघ्रिसेवामहाभाग्यम् ।
न प्राप्त मिति महात्मन् । धन्योऽहं त्वत्कृपापात्रम् ॥ 52

दूरात्करिपुरात्तीर्त्वा । नदीः, क्रान्त्वा महाटवीः ।
अद्री नारुह्यावरुह्याऽ । गतः; स्नेहः किया न्मयि ? ॥ 53

मनोरथोऽस्ति मे कश्चित् । यत्सिद्धिं संशये; यतः ।
पुरेव क्रियते व्यर्थ । इति शंकाकुलं मनः ॥ 54

अभिलष्यत्यात्मा मे । भवते गुरुदक्षिणा समर्प्येति ।
मा वादीः ! प्रतिषेधम् । तारय ! मां; वृण्वभीष्टवस्तूनि ॥ 55

धनराशीन् धान्यराशीन् । क्षेत्राणि स्वर्णसूनिच ।
यच्छाम्यहं किं बहुना ? । स्वाङ्गं छित्त्वापि दीयते ॥ 56

परिग्रहानुग्रहेण । धन्यं मां कुरु सर्वथा" ।
इत्यूचिवांस माचार्योऽ । ब्रवी च्छीर्षं मृदु स्पृशन् ॥ 57

"अहं कथं दक्षिणीयो ? । मया किं शिक्षितं तव ?
कथं शिष्योऽस्यपूर्वेयम् । शैष्योपाध्यायिकावयोः ॥ 58

अभिनन्द्यः सर्वथाऽसि । तिष्ठ! त्वं; साधया म्यहम्" ।
इति निर्यातुकामं तम् । दण्डवत्प्रणिपत्य सः ॥ 59

"गुरुदेव ! प्रसीदेष्टाम् । गृहाण! गुरुदक्षिणाम् ।
अनृणं कृतकृत्यं च । कुरु मा" मित्ययाचत ॥ 60

दीनालापै र्याचितोऽपि । चिंतयन् दक्षिणां कथम् ।
गृह्णाम्यशिक्षिताच्छिष्या" । दित्यगृह्णन्नयाद्गुरुः ॥ 61

6

तत स्तत्रस्थितः पार्थ । स्तं प्राप्याह "वनेचर !
कंचिच्छिष्यं कृतीकर्तु । माचार्येण प्रतिश्रुतम् ॥ 62

शिष्यस्त्वं यदि गृह्येथाः । प्रतिज्ञाभंग आपतेत् ।
येनाचार्यो दूषितः स्यात् । ततस्तेनावधीरितः ॥ 63

यथास्यादृजु राचार्यः । कृतार्थस्त्वं यथा भवेः ।
कश्चित्तथाविधोपायः । कथंचिदपि चिंत्यताम् " ॥ 64

एवं वदति किरीटिनि । विषण्णचित्तेन तेन शबरेण ।
कथमप्याचार्यस्य । शिष्यत्वं प्रीणता समाधायि ॥ 65

"प्रतिज्ञातः शिष्य एव । क्रियतां गुरुणा कृती ।
द्रोणशिष्योऽयमित्येत । दलं मे केवलं यशः ॥ 66

जीवाम्यहं शिष्यरेणु । भ्रात ! मास्तु ममेतरत् ।
इतिकर्तव्यतामूढम् । कर्तव्येऽद्य नियुंक्ष्व माम्" ॥ 67

तेन हृष्टः पाण्डवोऽख्यत् । "यद्येव; मुपपद्यते ।
त्वद्दक्षिणकरांगुष्ठो । गुरवे दक्षिणार्प्यताम्" ॥ 68

7

इति वचनेऽवसिते स । व्याधश्छित्त्वात्मनोऽगुष्ठम् ।
गुरुदक्षिणां समार्पिप । दाचार्यार्थं तदा तस्मै ॥ 69

गुरोरनपराद्धस्याऽ । पतन्मूर्धनि दुष्कृतम् ।
पाण्डुपुत्रस्यासहिष्णो । र्वनेचरयशो घ्नतः ॥ 70

भगवान् द्रोणस्सदयः । शिष्यस्य हितं विचिंत्य पार्थस्य ।
कबलीचकार शूली । विषमिव हा ! हन्त ! तदपयशः ॥ 71

2. रुरुप्रमद्वरम्

1

फलपुष्पा ण्यलभ्यानि । पश्यन्त्यै लब्धुमिच्छया ।
अपचित्याग्रशाखाभ्यो । रुरु स्तस्यै प्रयच्छति ॥ 1

"पुष्पधूल्याकुले नेत्रे । भोः ! फूत्कुर्वि" ति याचते ।
"मास्प्राक्षी!" रिति वक्तारम् । स्पृशत्येव हसन्मुखी ॥ 2

सवयोभिः सखीभि स्ताम् । क्रीडन्तीं बालिकां जिताम् ।
धारयन्तीं सन्निधाय । रुरु र्मोचयति स्वयम् ॥ 3

विधूनयन् पुष्पशाखा । स्तरोः कन्या मथस्थिताम् ।
अभिषिंचन् सुमासारै । रभिषिक्त स्तया पुनः ॥ 4

कलस्वरं हसन्ती सा । निकुञ्जेषु निगूहिनम् ।
गुप्तक्रीडासु धावित्वा । मृग्यन्ती संस्पृशत्यमुम् ॥ 5

परस्परं प्रश्नयन्तौ । निगूढार्थाः प्रहेलिकाः ।
तौ पर्यायेण जयिनौ । हसतःस्म जितौ मिथः ॥ 6

उदञ्च्यते जलं तेन । सिच्यन्ते तरव स्तया ।
आद्यानि मे; तवान्यानि । फलानीत्याह हासिनी ॥ 7

अन्विष्यन्ती तत्र तत्र । रुरुमेवोपगच्छति ।
आहूताऽपीतरैर्बालै । रध्येतुं बालिकामणिः ॥ 8

यथाच्छायात्मनस्तस्य । तच्छाया च यथात्मनः ।
पतेदंगे तथा स्थित्वा । बाला सन्ध्यासु मोदते ॥ 9

शिलाघातात्स्रवद्रक्त । पादाग्रां रुदतीं रुरुः ।
प्रमृज्य बाष्पाण्युद्धृत्य । वहन् स्कन्धेन गच्छति ॥ 10

क्रीडन्त्याश्चरणे तस्याः । कण्टकेन क्षते बत! ।
पश्यतः कण्टकशतै । रुरोः पादः क्षतो भवेत् ॥ 11

बालशाखा बालशाखा । स्त्रियं वल्लीषु वल्लरी ।
मयूरी च मयूरीषु । चरन्ती तत्र दृश्यते ॥ 12

नाश्नात्यददती तस्मै । यत्किंचिदपि बालिका ।
दत्तं परैश्च यत्स्वस्मै । तदर्धं सोऽपि यच्छति ॥ 13

हसिता तेन "शुकीति"। "गोरंकुस्त्वन्त्वसी" ति सा ब्रूते।
"हरिणी" त्यपहसिताऽह । "हरिण" स्त्वमसीति च
प्रगल्भेव ॥ 14

तस्य तरो रेव फलम् । स्वादीयोऽभू त्तया करस्पृष्टम्।
तस्यैव च प्रसूनम् । तयात्वपचितं रुरोः सुगंधितरम्॥ 15

अवीक्षमाणावन्योन्यम् । न क्षमेते मुहूर्तकम् ।
उत्तानहृदयौ दृष्ट्वा । तौ नन्दन्त्याश्रमस्थिताः ॥ 16

2

कालेन गच्छतांगेषु । संनद्धं यौवनं तयोः ।
शनै र्दूरापसृतयो । श्चित्ते संश्लिष्यतो मिथः ॥ 17

उपक्रमेते संलाप । मन्योन्यं तौ यथापुरम् ।
गद्गद्यन्तौ वचोमध्ये । त्रुट्यन्तौ लपत स्तदा ॥ 18

संगच्छेते न चान्योन्यम् । संगम्यापि न पश्यतः ।
परिवृत्य मुखे दृग्भि । र्जेघ्नीयेते शरैरिव ॥ 19

आत्मनः शैशवक्रीडा । गोष्ठीचेष्टा स्तदातदा ।
प्ररोमन्धायमानाभ्याम् । ताभ्या मानन्द्यते मनः ॥ 20

3

निहताऽकाण्डे काचि । द्धालशुकी प्रेमपात्रमाश्रमिणाम् ।
स्थूलोतुना कदाचि । द्यच्छुत्वा तापसैश्च बहुरुदितम् ॥ 21

नलिनीं ललामभूताम् । सरसो गज उज्जहार मदमत्तः ।
छिन्ना मूले लतिका । मनोहरा मूषिकेण हतकेन ॥ 22

दुःशकुनान्यवलोक्य । प्रत्यक्षं, प्राप्य दुःस्वप्नान् ।
शंकितमतिभि र्मुनिभि । र्विनिश्चितं शान्तिकर्मणांकृतये॥ 23

4

सह तापसकन्याभिः । खेलन्ती बालिका प्रमादेन ।
पादेनामर्द्याऽहिम् । तेन क्रुद्धेन हन्त! सन्दष्टा ॥ 24

फेनायमानसृक्का । तिमिरपिहितदृग्विलुसमुखकान्तिः ।
निश्चलकनीनिका च । प्रमद्वराऽम्रियत हन्त! हा! हा! धिक्! 25

"भ्रान्त्यात्मानं दृष्टमात्रम् । जना" इत्युत्थदुष्फणः ।
जागर्ति सर्पः संन्दष्टुम् । मर्षयेत् किं प्रमर्दितः ? ॥ 26

सख्य स्तस्या रुदत्यस्ताः । सोरस्ताडं प्रधाविताः ।
आवेदयन्नाश्रिमिभ्यो । वैक्लव्याहतचेतसः ॥ 27

अस्तंगतेवेन्दुकला । वातोद्धूतेव दीपिका ।
मृता सा; येन संच्छन्नम् । दिवाऽपि तमसाऽश्रमम् ॥ 28

"भगिनी मम कुत्रास्ते ?। स्वसा मे क्वास्ति ? हा! हताः।
अविधा! अविधे" त्युच्चैः । सख्यः क्रन्दत्य आगताः ॥ 29

विवर्णवदना वाष्प । धाराक्लिन्नमुखा मृगाः ।
पश्यन्तःपालनीं स्वीया । मनदन्तस्तृणं स्थिताः ॥ 30

व्यरमन्नृत्यात् केकी; व्यरमद्रुत! कोकिलापि कलगानात्।
विरतवचाः कीरोऽपि । तच्छिष्यतया कृतज्ञभावेन ॥ 31

जलसेकै रालवाले । ष्वात्मानं दोहदैश्च सा ।
संपोष्यावर्धयच्चेति । वृक्षैर्मूकैः स्थितं शुचा ॥ 32

5

दुःखोदन्तममुं श्रुत्वा । रुरुः शोचन् प्रमूर्छितः ।
क्षणादुत्थाय चुक्रोश । यन्निशम्यारुदन् शिलाः ॥ 33

"प्राग्जन्मस्विह जन्मनि । चाचरितं यत्तपो मया सर्वम् ।
मुनयः! प्रदीयते; मे। प्रमद्वरा योज्यतां प्राणैः ॥ 34

तपसः फल मेषा मम;। मूर्तं पुण्यं; मम प्राणाः ।
प्राणानां; न च जाता। जनिष्यते नापि तादृशी बाला ॥35

क्रूरसत्त्व राश्रमेषु । प्रशान्तैर्भूयते खलु ।
कथं हन्ताहिनाऽनेन । नोत्सृष्टं क्रौर्यमात्मनः ॥ 36

'सुकृती गतायु' रिति वा । ग्लक्ष्यं भूता ममार सा बाला ।
'पापी चिरायु' रिति वा । ग्लक्ष्येण मया कियच्चिरं
जीव्यम् ॥ 37

क्षीणसारं स्थाणुकल्पम् । ममांग मभव द्यतः ।
कर्तुं नालमहं किंचि । जीवन्नपि मृतोऽस्म्यहम् ॥ 38

निर्वाणमाश्रमज्योतिः; । त्रस्ता माला गलान्मम ।
समुज्ज्वलाऽश्रशत्तारा । दैवेनोपहतोऽस्मि हा ॥ 39

वनदेवते! ऽम्ब! कृपयाऽ । विलम्ब्य संजीवकरणीं ते ।
दत्वा प्रमद्वरायै । जीवय! सा मे शरीरार्धम् ॥ 40

हरिणाः ! 'हरिणाक्षीं' वः । प्रियां सखीमन्तेरण हरिणांकः ।
विज्ञाप्यतां भवद्भि । स्तेनाप्तेनाऽमृतेन सा जीव्या" 41

एवं रुदतोप्यस्य । यावत्संप्रार्थना न फलिताऽभूत् ।
केनापि, ताव "देते । बिम्यति कालादि" वेति
मुनिपुत्रः ॥ 42

क्रुध्यन् तस्मै मनसा । प्रज्वलताऽब्रूत "रे ! काल !
पापिन् ! प्रत्यर्पय मे । प्रमद्वरासू स्त्वया मुषितान् ॥ 43

भवितव्यं शप्तेन । त्वयाऽन्यथाऽद्येति; यच्छ्रुत्वा ।
स कृतांत स्सन्त्रस्त । स्तं सांत्वयितुं विसृष्टवान् दूतम् ॥ 44

6

आगत्यायमदृश्यो । व्योम्नि स्थित्वा गभीरकण्ठेन ।
प्राहैवं तं दूषण । तिक्तानि वचांसि सांत्वमधुराणि ॥ 45

"रुरो ! किं मन्यसे कालम् ? । समवर्ती स धर्मराट् ।
कथं तमीहसे शप्तुम् ? मुष्टिनाऽद्रिं भनक्षि किम् ? ॥ 46

विद्यावानपि मूर्खस्त्वम् । प्रतिभासि रुरो ! मम ।
जन्ममृत्य्वोः कर्म जन्तो । र्हेतुर्नात्र यमः प्रभुः ॥ 47

मृतैः कैर्वा जीव्यतेऽत्र ? त्वं शप्ता किं न शप्यसे ?
भगवान् दयमान स्ते । प्रियं कालश्चिकीर्षति ॥ 48

यदि स्निह्यसि तस्यां त्वम् । यदि दूनोऽसि तत्कृते ।
तवार्धायुर्यच्छ तस्यै । येन सा धारयेदसून्"॥ 49

7

स निशम्येदं वचनम् । "प्रमद्वरायै प्रदीयतेऽर्धायुः" ।
इति यावद्वक्ति गिरम् । तावत्स्वापादिव प्रबुद्धा सा ॥ 50

नलिनीव धौतपङ्का । शशिरेखेव च वलाहकान्मुक्ता ।
सा कन्याद्योतिष्टा । पास्ताहिविषा यथापूर्वम् ॥ 51

प्राप्तमृत्युर्लब्धजीवा । बभासे सा रुरोर्दृशोः ।
प्रतप्तस्वर्णवल्लीव । पूर्वतोऽपि समुज्ज्वला ॥ 52

मन्त्राक्षतान् मौनिवर्गो । वनलक्ष्मीः सुमाक्षतान् ।
तच्छीर्षयो र्व्यकारिष्टाम् । शकुन्तैर्मंगले कृते ॥ 53

"किं न यच्छति यो मह्य। मद्दा दर्धमायुषः" ।
इत्यग्रहीत्तदर्धांग । मादौ; शिष्टं क्रमाद्वधूः ॥ 54

तदारभ्यावर्तयन्तौ । शैशवाभ्यस्तकेलिकाः ।
पुनःपुनः प्रीणयन्ता । वन्योन्यं तौ ननन्दतुः ॥ 55

3. चिक्रोडकथा

1

परस्परं स्पर्धमाना । उत्पाट्याद्रीन् महातरून् ।
आनीयांभोनिधेर्गर्भे । पातयन्ति कपीश्वराः ॥ 1

कृतहस्तः सेतुबन्धे । नलस्तांस्तान् महोदधौ ।
प्रतिष्ठाप्य निबध्नाति । सेतुं दृष्टश्रुतेतरम् ॥ 2

मुखं व्यादाय जलधिः । शैलादींस्तत्र पातितान् ।
सर्वभक्ष इवश्नस्ता । नुद्गिरत्यूर्मिघोषणैः ॥ 3

खेदाम्बुभिः कर्मकृताम् । कपीनामुच्छ्रयन् भृशम् ।
अब्धिः सेतुं बध्यमानम् । निर्मज्जयति नैकशः ॥ 4

अक्षान्त्येव च वाराशि । र्वानराणां बलानि च ।
आघातैः प्रतिघातैश्च । श्रमयन्ति परस्परम् ॥ 5

सुग्रीवाज्ञाभंगभीत्या । भक्त्या च रघुनन्दने ।
यावच्छक्यं जागरूकै । र्निर्व्यूढाः कपिभिः क्रियाः ॥ 6

भूत्वा ते सहकृत्वानः । प्रेरयन्तः परस्परम् ।
कपिसंघा दिवारात्रम् । कार्यनिर्वहणोद्यताः ॥ 7

सहस्रैरिव हस्तैश्च । सहस्रैरिव चांघ्रिभिः ।
गजायुतबलेनेव । चैकैको व्यापृतः कपिः ॥ 8

नक्तंदिव मजानन्तो । न वशा क्षुत्पिपासयोः ।
ध्यायन्तो रामपादाब्जे । क्रियाः कुर्वन्ति वानराः ॥ 9

2

एकदानुसृतो भ्रात्रा । सुग्रीवेण च संचरन् ।
सेतुबन्धन कार्याणि । राघवः पर्यवेक्षते ॥ 10

सेतुक्रियावानरै स्तै । र्भूः प्रसूतेव निर्गतैः ।
पिपीलिकागांगयात्रा । समा याति शनैर्गतिः ॥ 11

"दशयोजनविस्तीर्णः । शततालद्व्यस उदधिरयम् ।
बद्धव्यः कथ" मिति हृदि । चकार चिंतामतीव काकुत्स्थः ॥12

परिवृत्तिः खलु भूमेः; व्योम्नि प्लवनं हि हस्ताभ्याम् ।
उत्पातनं हिमाद्रेः; रचना सेतोर्महांभोधेः ॥ 13

3

तरुशाखाशिखरस्थ । श्चिक्रोडः कश्चिदीक्षमाणस्तत् ।
क्लिश्यति हृदि "न समाप्ता । सेतोरचनाऽद्ययाव" दिति ॥14

"चंचूपुटैः काकगृद्ध्राः । पातयन्त्यंबुधौ शिलाः ।
चटकाः सूत्रखण्डानि । चारं चारं ककुब्गणे॥ 15

अनुगच्छन्त्यब्धिमार्गम् । बद्धश्रेण्यः पिपीलिकाः ।
धावन्ति पतगास्तत्र । स्वस्वसेवाप्रदित्सवः ॥ 16

हन्त ! हन्तैभि रन्यैश्च । भग्नांगैः श्रम्यते भृशम् ।
धिङ्मां ! धिङ्मां ! कर्तुमत्र । नकिंचित्प्रभवाम्यहम् ॥ 17

चिक्रोडश्चिंतयन्नेवम् । मुञ्चन्नश्रूणि वीक्षते ।
दिशः शून्या; मनो दग्धम् । दधात्यास्यं च कोचति ॥ 18

4

श्रीरामनाम वदने; हृदये श्रीरामपादपद्मयुगम् ।
श्रीरामरूपमक्ष्णोः । पुरतः; कुर्वन् मुहूर्त मस्थात्सः ॥ 19

उड्डीय पतङ्गमव । न्निपत्य तीरेऽम्बुधेः सेवाम् ।
कर्तुं विचिंत्य काम । प्यप्रभविष्णुः परं दुःख्यनू ॥ 20

शरवेगेनाधस्ता । द्वृक्षस्याग्रा, दधस्पदा चाब्धिम् ।
धावित्वा चिक्रोडः । क्षणात्प्रविष्टस्तदम्भांसि ॥ 21

स्नातस्तटमारूढः। सिकतास्ववलुण्ठ्य पुनरसौ यातः।
सेतोर्बन्धनदेशे। सैकतरेणून् पुनःपुनर्धुवति॥ 22

5

स्वस्यैव सिकतालेशै। र्गाधोऽम्भोधिर्भवे; त्ततः।
निरन्तरायं बद्धःस्या! त्सेतु रित्यमुदञ्च सः॥ 23

स्पर्धमान इवात्यन्तम्। चिक्रोडः सह वानरैः।
सैकतादम्बुधिं तस्मा। त्सैकतं प्रति धावति॥ 24

तटदेशमटन् रामः। सहागतो भ्रातृवानरेन्द्राभ्याम्।
दूराद् दृष्ट्वा जन्तुम्। तं स्मयमानोऽवद त्स्वपार्श्वस्थौ॥ 25

"अन्यदेवकृतं साह्यम्। वानरै र्बलिभि र्मम।
अन्यदेव च चिक्रोड। कृतं भोः! कौतुकावहम्॥ 26

प्रभवेयं शोधयितुम्। ऋणं कपीनां यथाकथंचिदपि।
नालं निर्यातयितुम्। चिक्रोडस्य तु जनुःशतेनाऽपि॥ 27

आनीयतां दिदृक्षेऽहम्। तं चिक्रोडं सुहृद्वरम्"।
इत्यादिष्टो वानरेन्द्रः। सुग्रीव स्तं समानयत्॥ 28

पुरो विलोक्य काकुत्स्थम्। भगवन्तं प्रणम्य सः।
कृत्वा प्रदक्षिणान् भक्त्या। पपात पदपद्मयोः॥ 29

"कृच्छैर्व्रतैस्तपोभिश्च। यो देवो हि सुदुर्लभः।
स दृष्टोऽश्रम मल्पिष्ठ। जन्तुना किं मया कृतम्"॥ 30

इत्यभिनन्दन्तं स्वम् । तं जन्तुं वीक्ष्य संप्रीतः ।
मेने दाशरथिर्हृदि । "नायं चिक्रोडमात्रोऽस्ति ॥ 31

दृष्टं श्रुतमपि नैव । प्राणिष्वल्पेष्वमूदृशं चरितम् ।
केनाऽप्यभाग्यहेतो । स्स्वतपोभ्रष्टेन भवितव्यम् ॥ 32

6

मत्वैवं हस्ताभ्या । मुद्धृत्य मुहुर्मुहु स्तमामृशति ।
लालयति स्मितपूर्वम् । चुम्बति; संलापयति च पुत्रमिव ॥33

"चिक्रोड ! मे प्राणबन्धो ! हृष्टोऽस्मि तव सेवया ।
नालं प्रत्युपकर्तुं ते । वरं वृण्वि" ति सोऽब्रवीत् ॥ 34

ततः प्रणम्य चिक्रोडोऽ । वद "द्धन्योऽस्मि भोः प्रभो !
रोचते मे वोढुमङ्गम् । त्वदनुग्रहचिह्नितम्"॥ 35

इति तत्रभवान् रामोऽ। भ्यर्थितस्तंस्पृशन् मृदु ।
गात्रेऽस्यामुद्रयद्रेखा । स्तिस्रो हस्तेन सुन्दराः ॥ 36

भूयोऽर्थितः स तस्मिन् । प्रायुंक्ताशिष "ममू रेखाः ।
कुलमुद्रा अनूबध्न । न्त्यनन्तरीयान" पीति कारुणिकः ॥ 37

चिक्रोडं निर्यान्ताम् । पश्यन्नास्ते चिरेण दाशरथिः ।
परिवृत्य च स प्रणमन् । मुहुर्मुहु रधाव दब्धितटम् ॥ 38

4. गानपरीक्षा

सुरगायनयो र्नारद । तुम्बुरयो रात्मनस्तरतमत्वे ।
स्पर्धांकुरः प्रभूतः । क्रमेण वृद्धश्च वृक्ष इव ॥ 1

कुशला ये संयमितुम् । शिरसी खल्वाटयोर्महात्मानः ।
उभयो स्ते पार्श्वगता । अजुहवुरेधांसि वैराग्नौ ॥ 2

हस्तिमशकांतरं ना । वित्येके "नाब्धिपल्वलांतर" मिति ।
अपरेण चोक्तमिति च । कथितं कर्णेजपै र्मिथो बहुधा ॥ 3

तृणाय मन्यतेऽन्यं कोऽ । प्यन्यस्तं मनुते रजः ।
देशकालौ प्रतीक्षेते । तौ पराभवितुं मिथः ॥ 4

उभौ दिव्यमुनी एव । सात्त्विकौ ज्ञानिनौ च यौ ।
तथापि तौ प्रावृततताम् । निन्दन्तौ पामराविव ॥ 5

तौ विरिञ्चि मुभौ गत्वा । कदाचित्प्रणिपत्य तम् ।
"निर्णीयतां तारतम्य । मावयो" रित्ययाचताम् ॥ 6

प्राह भगवान् विधाता । "तुम्बुर ! मे नारदः पुत्रः ।
येन भवान् भवदीया । मां ब्रूयुः 'पक्षपाती' ति ॥ 7

ततो विहाय मां गत्वा । वैकुण्ठं पृच्छतं युवाम्" ।
इत्युक्तमात्रं तद्द्वन्द्वम् । प्रतस्थे हरिमंदिरम् ॥ 8

तयोः श्रुत्वाऽभ्यर्थनां ताम् । विष्णुरप्याह "तुम्बुर !
ज्ञातं ते खलु मुख्योऽयम् । भक्तेषु मम नारदः ॥ 9

शङ्कितः स्यां पक्षपाती । न त्वया त्वितरैर्जनैः ।
मया भवत्तारतम्यम् । विनिर्णेतुमसांप्रतम् ॥ 10

तपस्यन्तं हनूमन्तम् । हिमशैले युवां गतौ ।
पृच्छतं; येन वां ज्ञेयम् । तारतम्यं भविष्यति ॥ 11

स महात्मा रामभक्तो । यश्च गायनतल्लजः ।
यं गायकाः प्रणम्यादौ । गातुं व्याददते गलम्" ॥ 12

इत्याज्ञप्तं मुनिद्वन्द्वम् । मववीर्य दिवो भुवम् ।
आञ्जनेयं तपोनिष्ठम् । गत्वैक्षिष्ट हिमाचले ॥ 13

शनैरुन्मील्याक्षिणी स । विलोक्य पुरतः स्थितौ ।
मुनी, कथां तयोः श्रुत्वा । हनूमां स्ता वभाषत ॥ 14

"शिलासने स्वीक्रियेताम् । भवद्भ्यामत्र तापसौ !
मया नीराजनं याव । द्राघवाय समर्प्यते" ॥ 15

इत्युदित्वा वानरेंद्रः । स्तोत्रगीतं प्रचक्रमे ।
स्थाणवोऽङ्कुरिता येन । प्रद्रुता अभवन् शिलाः ॥ 16

शिलापीठद्वये लीने । तौ पङ्कान्तर्न्यमज्जताम् ।
कपिगानवशीभूतौ । नाजानीतां दशामिमाम् ॥ 17

यावद्गीतं समाप्यायम् । नयने उदमीलयत् ।
तावल्लग्नं मुनिद्वन्द्वम् । घनीभूतशिलान्तरे ॥ 18

दिनान्ते मुकुलीभूते । जलजाते द्विरेफवत् ।
नारदस्तुम्बुरश्चास्ताम् । लग्नार्धाङ्गौ विपद्गतौ ॥ 19

तपस्विनौ हन्त! हन्त! क्लिश्यन्तौ क्षुब्धमानसौ ।
पश्चात्तौ बहिर्गन्तु । मायस्यन्तौ बभूवतुः ॥ 20

"बहिः प्रापय मां मा" मि । त्यार्तालापौ पुनः पुनः ।
हनुमां स्तावुभौ वीक्ष्य । प्राह "भोः श्रूयतां मुनी ! 21

तारतम्यावबोधाय । युवामत्रागतौ खलु ।
शिलासने यथा लीने । भवद्भ्यां गीयतां तथा" ॥ 22

श्रुत्वोपावीणयत्सद्यो । यावच्छक्यं स तुम्बुरः ।
भिन्नभिन्नान् गीतरागान् । महान्तं कालमेव च ॥ 23

तथैवास्तां घनीभूते । शिलासन्धौ यथापुरम् ।
मृदुत्वमपि नप्राप्ते । व्यरंसीद्धन्त ! तुम्बुरः ॥ 24

उपक्रान्ते ततो गीते । नारदेन महर्षिणा ।
शिलापट्टौ मृदूभूय । बन्धो व्यश्लिष्यदल्पशः ॥ 25

आविष्कृत्य कलाप्रौढि । मगासी दृषिपुङ्गवः ।
चिरमेव दृषत्पीठे । नाभूतां तु म्रदीयसी ॥ 26

यथा पङ्के विनिर्मग्नौ । बहि रागन्तु मक्षमौ ।
गजौ क्षुब्धौ मुनी दृष्ट्वा । हनुमा नन्वकम्पत ॥ 27

असमाप्ते नारदस्य । गीतमेवावलंब्य सः ।
आलपन्मधुरं येन । व्यलीयेतां शिलासिके ॥ 28

"दिष्ट्या लब्धं जीवितं मे" । मयाप्तं हि पुनर्जनुः ।
"सुप्रातोऽसीति हृष्यन्तौ । मुनी पङ्काद्बहिर्गतौ ॥ 29

प्रणिपत्य हनूमन्तम् । गीतविस्मितचेतसौ ।
विलीनविद्यादर्पौ तौ । जग्मतु र्विनताननौ ॥ 30

ज्याया नित्येव गण्य:स्या । न्नारदस्तुम्बुरादपि ।
यथैव केकराक्षोऽन्धात् । तथापि स गतो ह्रिया ॥ 31

5. मेघः

पीत्वेव मद्यमब्दो । मत्तो भूत्वा स्खलद्गतिर्गच्छन् ।
आकाशवीथिकायाम् । तिष्ठन् गच्छति च विस्मृतो गम्यम् ॥ 1

"नायमैकांतिको देश" । इति शङ्कालवं विना ।
पतन्नङ्के, स्पृश्‍न् , गृह्णन् । मूढः श्लिष्यति तारकाः ॥ 2

न कदापि याति गृहिणीम् । वर्षासु यदृच्छया सकृद्याति ।
प्रत्युद्गतां पुरंध्रीम् । तटिल्लतां घोषणैं स्स भर्त्सयति ॥ 3

विहरन्ति नभोवीथ्या । मेकाकिन्योऽप्सरः स्त्रियः ।
चेद्दूषयेर्वज्रिणा त्वम् । छिद्यसे मेघ ! खण्डशः ॥ 4

6. कृतज्ञता

स्वरक्षणे जाग्रतो ये । घनास्तेषां विनिर्गमात् ।
म्लानो ग्लानो वृक्षकोऽस्ति । भ्रियमाणः कथंचन ॥ 1

स मर्मरैः प्रार्थयते । यातायातान् समीपगान् ।
न विदुः किंनु तद्भाषाम् ? द्रष्टुं तं कोऽपि नागमत् ॥ 2

अवेक्ष्य शोच्यतां तस्य । श्रुत्वा च प्रार्थनारवान् ।
निर्भिन्नहृद् द्रुलद्बाष्प । स्तं जीवयितु मैषिषम् ॥ 3

आलवाले दत्तसारे । कृतैः सलिलसेचनैः ।
द्वित्रैरेव दिनै र्वृक्षः । स दृष्टोऽपूर्वव्ज्जनैः ॥ 4

प्रकृतिस्थः क्रमाद्रूजो । दृढस्कन्धश्च सारवान् ।
ऋणनिर्यातनार्थं मे । त्वरमाण इवावृधत् ॥ 5

प्राप्तकाले यथाशक्ति । पत्रपुष्पफलै र्युतम् ।
शाखाकराञ्जलिं भक्त्या । चलाङ्गो मह्य मार्पिपत् ॥ 6

"त्वयैवेदं दत्तमङ्गम् । तवैव; नतु मामकम् ।
छित्वा मां गृह्यतामिष्ट" । मित्यख्यद्भ्रमरस्वनैः ॥ 7

मत्साद्कृत्य स सर्वस्वम् । यावज्जीवं; मृतश्चमाम् ।
प्राप्य काष्ठेंगालभावम् । भस्मीभूयाऽप्युपाचरत् ॥ 8

7. शिलादृश्यम्

वर्षातपैर्नाभिभूतः । शैलशृङ्गोपरि स्थितः ।
मौनमुद्रां दधत्कोऽपि । तपस्यति महोपलः ॥ 1

स्पृष्टोऽपि शाखातन्वीभिः । पुष्पस्तनदलांशुकैः ।
गायन्तीष्वप्यासु कीर । कण्ठैर्नैषच्चलत्यसौ ॥ 2

अभितः परिवृत्यैनम् । प्रस्तराः प्रतिशेरते ।
तत्त्वोपदेशं प्राप्ता नु । समाध्याविष्टचेतसः । 3

कदा त्यक्तसमाधिः स्यात् ? कदा स्यात्तदनुग्रहः ?
इत्युत्कण्ठा स्तमीक्षन्ते । निर्निमेषदृशो जनाः ॥ 4

8. शैलः

काऽददाच्छैशवे स्तन्यम् । तुभ्यं माता ? यतो गिरे !
वज्रकायोऽसि; दीर्घायु । स्तव कस्याशिषः फलम् ? 1
पाषाणहृदयोऽपि त्वम् । त्वत् स्रवंति कृपापगाः ।
आश्रितान् क्षुद्रजन्तून । प्यवत्याश्रयदो भवान् ॥ 2
ओषधीः साररत्नानि । चार्थिभ्य स्त्वं प्रयच्छसि ।
यतस्ते कीर्तिशृङ्गाणि । भासंनेऽभ्रंलिहानि भोः ॥ 3
प्रसूतो यस्य, येनासि । वर्धितो, ऽभू स्त्वमीदृशः ।
दृष्ट्वोन्नतिं प्रतिष्ठां च । ते मुदं कियती मियुः ? 4

9. चन्द्रः

मेघशैले, व्योमगङ्गा । तीरे, कोणे च कुत्रचित् ।
आस्ते तपोवनं यत्रा । वसच्चन्द्रो महामुनिः ॥ 1
युवा शुद्धः कलापूर्ण । श्चारुमूर्ति र्मनोहरः ।
तमोहर्ता स लोकस्य । चाकाशीति सगुन्नतः ॥ 2
मोहान्धा यौवनोद्रेका । त्पतन्तीं मुहुरात्मनि ।
अपास्यति करै र्दूरम् । नतु श्लिष्यति रोहिणीम् ॥ 3
आश्रमप्रांगणासीनः । सायं ज्योत्स्नामिषा दसौ ।
बोधय त्युडुशिष्येभ्य । स्तत्त्वगाथा दिने दिने ॥ 4

संशयेषु क्षालितेषु । तस्य प्रवचनै र्मुनेः ।
तुषाररूपेणाश्रूणि । ते मुञ्चन्ति विहायसः ।। 5

10. झरी

ऊर्मिहस्तैस्तीरयुग्मे । वृक्षाः श्रेणीकृता इव ।
तत्स्पर्शनात्कोरकिता । रेजुः पुलकिता इव ।। 1
गायति गीतं वंशे, । स्मितें कृतेऽपिच शरवणेन ।
मार्गं स्वस्य निरुध्य । स्थितेष्वपि प्रस्तरेषु मूढेषु ।। 2
वेणीधृतवनपुष्पा । मन्दानिलवृन्दवेपमानमनाः ।
आलिप्तफेनगन्धा । हंसीभिः संलपन्ती च ।। 3
दूरीभूताऽस्पृशन्ती तां । स्त्वं कुत्र प्रस्थिता झरि ?
तव प्रणयराज्ये क । मभिषेक्तु हृदीहसे ? 4

11. कोकिलः

स्वागतं भोःसखे! तुभ्यम् । वसन्तास्थानगायक! ।
बहोः कालात्तु दृष्टोऽसि । त्वया कुत्र गतं? स्थितम् ? 1
किं विनेतुं गतोऽसि त्वम् । किन्नरी र्दिव्यगायनीः?
अभ्यस्तं नूतनं गीतम् । गीयतां कर्णपेशलम् ।। 2
परुच्छ्रुतं मया गान । मुपचूतं स्थितेन भोः !
अद्ययाव त्पुनं र्नैव । श्रुतं तादृक्कुचि त्सखे ! ।। 3
यदायदा स माकन्दो । मया दृष्ट स्तदातदा ।
त्वद्गीतं स्मर्यते; स्वादू । द्रारा श्च्योद्यन्ति मे भृशम् ।। 4

चूतासनसमारूढे । त्वयि गायति किन्वभूत् ?
गीतामृतं तवाश्यानम् । मधुरं तत्फलं यतः ? 5

किंनु पीतं वल्लरीभि । र्यतः पुष्पाण्यधुर्मधु ?
किंनु मग्ना मारुताश्च । नचे ते शीतलाः कथम् ? 6

श्रुते श्रुते भवद्गीते । प्रतिभासि च मे पिक !
अपूर्वभाषाकाव्यस्य । रसघट्टान् पठन्निव ॥ 7

ऋतु स्त्वया विना मन्ये । विदेशस्थप्रिया वधूः ।
देश स्त्वया विना विद्वान् । कुतोऽपि हतवाक्कृतः ॥ 8

12. मन्दमारुतः

1

किं देवी प्रकृति र्माता । पीयूषार्द्रैः कराम्बुजैः ।
सहस्रैः स्वान् लालयन्ती । समालिङ्गति पुत्रकान् ? 1

स्वर्गस्थै र्नन्दनोद्याने । श्लिष्टामरवधूजनैः ।
रचिताः कविभिः श्लोकाः । किं स्वक्रीडाभिवर्णनाः ? 2

स्निग्धयोर्नूत्नदम्पत्योः । श्लिष्टान्योन्याङ्गयोः परम् ।
किं निभृतभाषितानि ? प्रदिष्टानि प्रियाणि च ॥ 3

सान्द्रीभूता नभस्यादौ । वायुभिः शकलीकृताः ।
अणुभूताश्च कालेन । किमदृश्याः पयोमुचः ? 4

अमरीभि र्निगूढाभि । स्तिरस्करिणिकावशात् ।
यै र्वीज्यन्ते जनाः स्निग्धा । स्तानि स्तनपटानि किम् ? 5

नचेत्कथ मियान् मोद ? इयती माधुरी कथम् ?
इयन्मृदुत्वशीतत्व । मोहाश्च प्राणिनां कथम् ? 6

मन्दानिलाः ! कुत्र तप्तं ? कोऽददा द्रूरमीदृशम् ?
मानिनौ संगमय्यात्त । पुण्यस्येदं फलं किमु ? 7

2

क्रियते हि मन्दमारुत ! भवता विश्वोत्सवः प्रसन्नेन ।
नान्योऽस्ति त्वादृश इति । तत्काले श्लाघ्यसे जगत्प्राणः ॥ 8

स्थित एव हठादङ्गम् । भयावहं यथा विवर्ध्योच्चैः ।
उन्मूलयन् महीजान् । भञ्जन् सौधान् गिरीं श्चलयन् ॥ 9

हुंकुर्वाणैर्महाघोरैः । सहस्रै राननै र्भवान् ।
ग्रसिष्णुरिव लोकांस्त्रीन् । लक्ष्यते कालरात्रिवत् ॥ 10

दहनेन प्रज्वलता । संगम्य त्वं कदाचि द्धिक् !
हित्वा भीतिं पापा । त्कारयसि च लोकसंहारम् ॥ 11

दृष्टश्चद्भिः शैशवे त्वाम् । जनः स्वप्नेऽपि तादृशः ।
भविष्यसीदृशः क्रूर । इति नासी र्विशङ्कितः ॥ 12

पिशाचेनेवचाविष्टो । विवशो नाशयन् भुवम् ।
दुःस्थितै र्दुःखितै र्भूयो । जनैः शप्तः कथञ्चन ॥ 13

अनुशोचन्निवाश्रूणि । मुञ्चन् वर्षमिषाद्भृशम् ।
गर्जाव्याजाद्वारितोऽपि । तूच्चै रोरुद्यते भवान् ॥ 14

13. पुष्पापचयः

समरंदैः सुमवृन्दैः । पत्रैर्हरितैश्च नेत्रपर्वकरीम् ।
उपसृत्य लतां कश्चि । च्चिन्वन् कुसुमानि संदृष्टः ॥ 1

पश्यति मयि स क्रूरः । पुष्पाण्यवचित्य निश्शेषम् ।
व्यपगतभूषां विधवां । बालामिव तां लतां कृतवान् ॥ 2

नास्त्यन्तरात्मा तस्येति । मन्ये; यद्यस्ति तर्ह्यसौ ।
न बोध्यते किं? "कार्यं तत् । दूष्यं द्राक्त्यज्यता" मिति ॥ 3

पश्यतो मम नेत्राभ्याम् । प्रस्नुता बाष्पवाहिनी ।
अयत्नमवदं "जाल्म ! किं काष्ठे ? ते करौ न किम् ? 4

अनपचितकुसुमभारा । नेत्रानन्दिन्युदीक्षमाणानाम् ।
सुभगा सुवासिनीव । वल्ली ते दृष्टि मपहन्ति ? 5

शपेयुः क्षुधिता भृङ्गा । हृतस्वा विलपेल्लता ।
"नष्टानि पुण्यक्षेत्राणी" । त्याक्रन्देन्मन्दमारुतः ॥" 6

इति रुष्टेन मयोक्तः । स आह "भगवान् महादेवः ।
कुसुमैर्लक्षैरर्च्य । श्चेतव्यान्यद्य सर्वपुष्पाणि ॥" 7

कर्णारुन्तुद एतस्य । श्रुते वाक्ये ममाऽजनि ।
मतिः "सताड्य तं कर्तुम् । गलहस्तबहिष्कृतम्" ॥ 8

कबलीकृतकोपेन । कथमप्युक्तो मया स दुष्टनरः ।
"मृत्पिण्डमते! मूर्ख ! पततो लतिकासु पश्य! भृङ्गांस्तान् ॥ 9

आयान्तं पातुं मधु । निवर्तयन् भृङ्गसंघातम् ।
किं कुसुमानि चिचीषसि ? निःशंकं देवपूजायै ? 10

अपहरसि बलाद्धन्त! । कबलानि मुखे कृतानि मधुपानाम् ।
न क्षालयितुं शक्यम् । जन्मशतेनापि पापमलम् ॥ 11

धिक्! धिक्! कृतगोघात । स्वचार्मिकपादुकाप्रदातेव ।
त्वं भवसि पुण्यलिप्सु । हतभृङ्गचय स्समर्चयन् देवम् ॥ 12

अवचित्य दुःखितेषु । प्राणिषु नकेषु कुसुमानि ।
अर्चयता भगवन्तम् । रे! मूर्ख! फलं त्वया किमासाद्यम् ? 13

तव हृदयकुसुममात्रम् । किं बहुना ? रोचते भगवते भोः ।
नत्वैतानि सुमानि । यदीच्छसि चिनुष्व पतितानि ॥ 14

अपचित सुगन्धिकुसुमै । निर्जीव शिलार्चनाच्छ्रेयः ।
अभिवादनंलतानाम् । सुमफलभारेणदर्शनीयानाम् ॥ 15

निशम्योक्तं मया सर्वम् । कृत्वा गालोडितं च सः ।
सानुतापं प्राह "देव! । दुष्कृतं यन्मया कृतम्" ॥ 16

तृतीयो भागः

तृणकणाः*

1

त्वां द्रष्टुमेव दत्ताभ्याम् । नेत्राभ्यां दृश्यते परः ।
त्वामर्चितुं प्रदत्ताभ्याम् । हस्ताभ्या मर्च्यते परः ॥ 1

त्वां गातुमेव वीणा मे । भवता देव! शिक्षिता ।
न प्रीणितोऽसि गीतेन । प्रीणिता धनिका मुहुः ॥ 2

भवता प्रदत्तभृत्या । समृद्धिमा, नाप्तबहुभोगः ।
नाहं भवन्तमभजे । वेतनवृध्यै मुहुर्मुहुर्याचे ॥ 3

स्थातुं मया समक्ष ते । न शक्य मपराधिना ।
न स्थातुं च परोक्षं ते । क्षाम्येत्कोऽन्योऽपराधिनम् ? 4

2

गणयसि न त्वं स्वर्णम् । मणिसञ्चयमप्ययस्कांत !
गाढ मयःखण्डे मे । स्निह्यसि; को नु खलु हेतुः स्यात् ? 5

राजतः काञ्चनैः पात्रैः । संपन्नोऽसि मणीमयैः ।
कुतो मृन्मयपात्राय । मम स्पृहयसि प्रभो ! 6

---

*Mistic Poetry.

वैणिकैर्वांशिकैरन्यैः। प्रीण्यसे खलु गायकैः ।
प्रीतिः कुतस्तेऽद्य जाता ? गीते रूक्षे मम प्रभो ! 7

3

प्रचलच्छम्पालतिका । प्रग्रहसंयमितवारिवाहाश्वैः ।
व्योमरथेनोढेन । सञ्चरमाणो मया स संदृष्टः ॥ 8

उपविशता सिकतासु । मया नदीशीतलोर्मिकारूपान् ।
स्वकटाक्षान् करुणार्द्रान् । प्रसारयन् वीक्षितो देवः ॥ 9

पिकस्वरश्रुतिं कृत्वा । सर्वान् पल्लवयं स्तरून् ।
गायन् श्राव्यं वसंताख्यम् । गेयं दृष्टः स गायकः ॥ 10

4

उदेतीदं कुतो ज्योति ? न कोऽप्यत्रास्ति; नैव च ।
व्योम्नि चन्द्र; स्तारकाश्च । संछन्नाः सांद्रवारिदैः ॥ 11

उदेतीदं कुतो ज्योतिः ? कियन्मे हृदयंगमम् ?
कियन्नेत्रोत्सवं कुर्व ? दपूर्वं मधुरं च यत् ॥ 12

किं कान्तिपुञ्जस्तेऽङ्गस्य ? किं स्मितं ते मनोहरम् ?
भगवं! स्त कृपाक्षीर । सिन्धोर्वा भङ्गसञ्चयः ? 13

5

ह्यः सायं चन्द्रकला । नौकारूढः सखे! गायन् ।
गगनधुनीसलिलेषु । विहरन्नास्ते भवान् हि सहमित्रः ॥ 14

अधिरूढो वारिदाश्वम् । रथ्यायां तारकावने ।
वाचाल्या विहरन् दृष्टो । द्यो रजन्यां भवान् खलु ॥ 15

उदयाद्रौ पौर्णमास्याम् । स्थितेन प्रत्यगङ्गनाम् ।
लक्ष्यीकृत्य सखे! क्षिप्तो । मल्लीगुच्छ स्त्वया खलु ॥ 16

6

यतमानः क्लिश्येऽहम् । भवन्तमुपसर्तु मनवधेः कालात् ।
देव ! कथ मुपसरेयम् ? । दिगन्तरेखेव दूरदूरगतम् ॥ 17

7

मम नेत्रपुण्डरीके, । मनःकुमुद, मंघ्रिपङ्कजद्वन्द्वम् ।
करकोकनदयुगं च । संग्रथ्य समर्पयामि तव पदयोः ॥ 18

8

पुष्पाञ्जले! तवैकैकम् । दूतीभूत्वा सुमं प्रभुम् ।
यातना मम विज्ञाप्य । मां करो त्वनुकम्पितम् ॥ 19

9

मम जीवितगाथास्ते । निवेदयाम्येव गानतन्त्रिकया ।
आशंसेऽनेकेषा । मंशाना मुत्तरं देव ! 20

10

त्वामेव मत्वा पुत्रं मे । देव! चुम्बामि तन्मुखम् ।
त्वामेव मत्वा श्लिष्यामि । सुन्दरीं मे दिने दिने ॥ 21

11

आहूतोऽहं किंकरैस्त्रि । र्नामग्राहं महोच्चकैः ।
गत्वा सभां करौ बध्वा । प्राड्विवाकपुरःस्थितः ॥ 22

बहुधा प्रश्नयन् मां स । वेपमानं भयाद्व्यधात् ।
अपराधे स्थापयित्वा । दण्डं द्वीपांतरस्थितिम् ॥ 23

पतित इव प्रासादा । द्वर्ते धिक्! पूतिगन्धिनि ।
अपारयन् समारोढु । मेकाक्यस्थां रुदंश्चरन् ॥ 24

दृष्ट्वोत्पततः पतगान् । वात्याधूतांश्च वारिदान् ।
अप्रभुस्तद्गतीः प्राप्तुम् । विषण्णोऽत्र स्थितोऽस्म्यहम् ॥ 25

अविधा! अविधा!! जन्म! न्यस्मिन् भुक्ताघसञ्चयः ।
पुनस्त्वां प्राप्य भो देव! किं भजेय यथापुरम् ॥ 26

12

उप्तं पुरा निम्बबीजम् । फलमाम्रस्य लिप्स्यते ।
अहं मूर्खः किमून्मत्त? उपहास्योस्मि सर्वथा ॥ 27

13

आगतो देव ! ते सौध । मुच्चैस्त्वामाहृयं मुहुः ।
प्रतिशब्दः श्रुतो नैव । यद्यासीः किं न भाषसे ? 28

14

नहि जलजे तव चरणे । मम हृद्भृगस्य चम्पके देव !
न च चन्द्रस्तव वदनम् । मम नेत्रकुवालयोरभूत्सविता ॥ 29

नाभयदस्तव हस्तः । करवालो भयङ्करः ।
न कटाक्षाः शातबाणा । विरुद्धोऽसि प्रभो ! कुतः ? 30

15

व्योम प्रणमति मूर्ध्ना । दिशाकरैरुत्थितै र्नमस्यति भूः ।
गिरयोऽभिवादयन्ते । पतिता; स्त्वामेव सागराः स्तुवते॥ 31

16

यच्छत सरितः ! पाद्यम् । लतिका ! अर्घ्यं; फलानि भो वृक्षाः !
पतगाः ! स्वागत; माया । त्वद्य कुटीरं ममातिथिर्देवः ॥ 32

17

मूलगतं त्वां देव ! वृक्षा मां पल्लवांगुलिभिः ।
जिज्ञापयिषन्तीति । श्रान्तो गत्वाऽस्मि भग्नाशः ॥ 33

शुद्धपत्रम्

पृष्ठसंख्या	असाधुः	साधुः
1	निर्भग्नस्य	निर्मग्नस्य
12	यावच्छ्रृतं	यावच्छ्रुतं
15	भूतपूवः	भूतपूर्वः
,,	विषो	बिषम्
19	सामन्तोऽस्ते	सामन्तोन्ते
20	कृताथिधेय	कृतातिथेय
23	नथसः	नभसः
26	प्रसारण	प्रसारणम्
27	मुहूतिर्धे	मुहूर्तार्धे
29	अगच्छत्	अगच्छन्
,,	त्वदाचार्यौ	त्वदाचार्यान्
35	भ्रान्त्या	भ्रन्त्या
37	क्रूरसत्व	क्रूरसत्वैः
,,	असू	असूं
39	इवश्न	इवाश्नं
43	निर्यान्ताम्	निर्यान्तम्
45	मवतीर्यं	अवतीर्य
48	दक्त	दत्त
50	मभिषेकु	मभिषेक्तुं
52	जनः	जनैः
54	सताड्य	सन्ताड्य
,,	नकेषु	नैकेषु
55	राजतः	राजतैः